श्रीगणेशाय नमः ॥ ॥ श्रीगोपालकृष्णाय नमः ॥ ॐ अस्य श्रीमद्भगवद्गीतामालामंत्रस्य भगवान्वेदव्यास ऋषिः ॥ अनुष्टुप् छंदः ॥ श्रीकृष्णः परमात्मा देवता ॥ अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषस इति बीजम् ॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति शक्तिः ॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इति कीलकम् ॥ नैनं छिंदंति शस्त्राणि नैनं दहति पावक इत्यंगुष्ठाभ्यां नमः ॥ न चैनं क्लेदयंत्यापो न शोषयति मारुत इति तर्जनीभ्यां नमः ॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव चेति मध्यमाभ्यां नमः ॥ नित्यः

सर्वगतः स्थाणुरचलोऽयं सनातन इत्यनामिकाभ्यां नमः ॥ पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रश इति कनिष्ठिकाभ्यां नमः ॥ नानाविधानि दिव्यानि नानावर्णाकृतीनि चेति करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥ अथ हृदयादिन्यासः ॥ नैनं छिंदंति शस्त्राणि नैनं दहति पावक इति हृदयाय नमः ॥ न चैनं क्लेदयंत्यापो न शोषयति मारुत इति शिरसे स्वाहा ॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव चेति शिखायै वषट् ॥ नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन इति कवचाय हुम् ॥ पश्य मे पार्थ रूपाणि

शतशोऽथ सहस्रश इति नेत्रत्रयाय वौषट् ॥ नानाविधानि दिव्यानि नानावर्णाकृतीनि चेति अस्त्राय फट् ॥ श्रीकृष्ण-प्रीत्यर्थे पाठे विनियोगः ॥ ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं व्यासेन ग्रथितां पुराणमुनिना मध्येमहा-भारतम् ॥ अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीमंब त्वामनुसंदधामि भगवद्गीते भवद्वेषिणीम् ॥ १ ॥ नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविंदायतपत्रनेत्र ॥ येन त्वया भार-ततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥ २ ॥ प्रपन्नपारि-जाताय तोत्रवेत्रैकपाणये ॥ ज्ञानमुद्राय कृष्णाय गीतामृतदुहे

नमः ॥ ३ ॥ सर्वोपनिषदो गावो दोग्धा गोपालनंदनः ॥ पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥ ४ ॥ वसुदेवसुतं देवं कंसचाणूरमर्दनम् ॥ देवकीपरमानंदं कृष्णं वंदे जगद्गुरुम् ॥ ५ ॥ भीष्मद्रोणतटा जयद्रथजला गांधारनीलोपला शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला ॥ अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी सोत्तीर्णा खलु पांडवै रणनदी कैवर्तकः केशवः ॥ ६ ॥ पाराशर्यवचःसरोजममलं गीतार्थगंधोत्कटं नानाख्यानककेसरं हरिकथासंबोधनाबोधितम् ॥ लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा भूयाद्भार-

तपंकजं कलिमलप्रध्वंसि नः श्रेयसे ॥ ७ ॥ मूकं करोति वाचालं पंगुं लंघयते गिरिम् ॥ यत्कृपा तमहं वंदे परमानंदमाधवम् ॥ ८ ॥ यं ब्रह्मा वरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः ॥ ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ ९ ॥ इति ध्यानम् ॥

धृतराष्ट्र उवाच । धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । मामकाः पांडवाश्चैव किमकुर्वत संजय ॥ १ ॥ संजय उवाच । दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा । आचार्यमुपसंगम्य

राजा वचनमब्रवीत् ॥ २ ॥ पश्यैतां पांडुपुत्राणामाचार्य मह-
तीं चमूम् । व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥
अत्र शूरा महेष्वासा भीमार्जुनसमा युधि । युयुधानो विरा-
टश्च द्रुपदश्च महारथः ॥ ४ ॥ धृष्टकेतुश्चेकितानः काशिरा-
जश्च वीर्यवान् । पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुंगवः ॥ ५ ॥
युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् । सौभद्रो द्रौपदे-
याश्च सर्व एव महारथाः ॥ ६ ॥ अस्माकं तु विशिष्टा ये
तान्निबोध द्विजोत्तम । नायका मम सैन्यस्य संज्ञार्थं तान्ब्र-
वीमि ते ॥ ७ ॥ भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।

अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥ अन्ये च वहवः शूरा मदर्थे त्यक्तजीविताः । नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥ अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् । पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥ अयनेषु च सर्वेषु यथाभागमवस्थिताः । भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि ॥ ११ ॥ तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः । सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् ॥१२॥ ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः । सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभवत् ॥ १३ ॥ ततः श्वेतैर्हयैर्युक्ते महति

स्यंदने स्थितौ । माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः ॥ १४ ॥ पांचजन्यं हृषीकेशो देवदत्तं धनंजयः । पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः ॥ १५ ॥ अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः । नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥ काश्यश्च परमेष्वासः शिखंडी च महारथः । धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥ द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते । सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक्पृथक् ॥१८॥ स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् । नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९ ॥ अथ व्य-

वस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः । प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः ॥ २० ॥ हृषीकेशं तदा वाक्यमिदमाह महीपते । अर्जुन उवाच । सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥ यावदेतान्निरीक्ष्येऽहं योद्धुकामानवस्थितान् । कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥ योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः । धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥ संजय उवाच । एवमुक्तो हृषीकेशो गुडाकेशेन भारत । सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् । उवाच

पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥ तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् । आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥२६॥ श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि । तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनवस्थितान् ॥ २७ ॥ कृपया परयाविष्टो विषीदन्निदमब्रवीत् । अर्जुन उवाच । दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥ २८ ॥ सीदंति मम गात्राणि मुखं च परिशुष्यति । वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥ गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते । न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३० ॥ निमि-

त्तानि च पश्यामि विपरीतानि केशव । न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१ ॥ न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च । किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा ॥ ३२ ॥ येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च । त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥ आचार्याः पितरः पुत्रास्तथैव च पितामहाः । मातुलाः श्वशुराः पौत्राः श्यालाः संबंधिनस्तथा ॥ ३४ ॥ एतान्न हंतुमिच्छामि घ्नतोऽपि मधुसूदन ॥ अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५ ॥ निहत्य धार्तराष्ट्रान्नः का प्रीतिः

स्याज्जनार्दन । पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥
तस्मान्नार्हा वयं हंतुं धार्तराष्ट्रान्स्वबांधवान् । स्वजनं हि कथं
हत्वा सुखिनः स्याम माधव ॥ ३७ ॥ यद्यप्येते न पश्यंति
लोभोपहतचेतसः । कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्
॥ ३८ ॥ कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् । कुल-
क्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥ कुलक्षये प्रणश्यंति
कुलधर्माः सनातनाः । धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभव-
त्युत ॥ ४० ॥ अधर्माभिभवात्कृष्ण प्रदुष्यंति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥ संकरो न-
रकायैव कुलघ्नानां कुलस्य च । पतंति पितरो ह्येषां लुप्तपिंडो-

दकक्रियाः ॥ ४२ ॥ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥ उत्स-
न्नकुलधर्माणां मनुष्याणां जनार्दन । नरके नियतं वासो भव-
तीत्यनुशुश्रुम ॥४४॥ अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः ॥४५॥ यदि मामप्रती-
कारमशस्त्रं शस्त्रपाणयः । धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं
भवेत् ॥४६॥ संजय उवाच । एवमुक्त्वार्जुनः संख्ये रथोपस्थ
उपाविशत् । विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादेऽर्जुन-
विषादयोगो नाम प्रथमोऽध्यायः ॥ १ ॥

संजय उवाच । तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् । विषीदंतमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥ श्रीभगवानुवाच । कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् । अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥ क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते । क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ ३ ॥ अर्जुन उवाच । कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन । इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥ गुरूनहत्वा हि महानुभावान्श्रेयो भोक्तुं भैक्ष्यमपीह लोके । हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान्रुधिरप्रदिग्धान्

॥ ५ ॥ न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः । यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥ कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः । यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ७ ॥ नहि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणाम् । अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥ संजय उवाच । एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप । न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥ तमुवाच हृषी-

केशः प्रहसन्निव भारत । सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः ॥ १० ॥ श्रीभगवानुवाच । अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे । गतासूनगतासूंश्च नानुशोचंति पंडिताः ॥ ११ ॥ न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव नभविष्यामः सर्वे वयमतः परम् ॥ १२ ॥ देहिनोऽस्मि-न्यथा देहे कौमारं यौवनं जरा । तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति ॥१३॥ मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ १४ ॥ यं हि न व्यथयंत्येते पुरुषं पुरुर्षभ । समदुःखसुखं धीरं सोऽमृत-

त्वाय कल्पते ॥ १५ ॥ नासतो विद्यते भावो नाभावो वि-
द्यते सतः । उभयोरपि दृष्टोंतस्त्वनयोस्तत्त्वदर्शिंभिः ॥ १६ ॥
अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् । विनाशमव्यय-
स्यास्य न कश्चित्कर्तुमर्हति ॥ १७ ॥ अंतवंत इमे देहा नित्य-
स्योक्ताः शरीरिणः । अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भा-
रत ॥ १८ ॥ य एनं वेत्ति हंतारं यश्चैनं मन्यते हतम् । उभौ
तौ न विजानीतो नायं हंति न हन्यते ॥ १९ ॥ न जायते
म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः । अजो
नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥२०॥

वेदाविनाशिनं नित्यं य एनमजमव्ययम् । कथं स पुरुषः पार्थ कं घातयति हंति कम् ॥ २१ ॥ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि । तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ २२ ॥ नैनं छिंदंति शस्त्राणि नैनं दहति पावकः । न चैनं क्लेदयंत्यापो न शोषयति मारुतः ॥ २३ ॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥ अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते । तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥ अथ चैनं नि-

त्यजातं नित्यं वा मन्यसे मृतम् । तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥ २६ ॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥ आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः । आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९ ॥ देही नित्यमवध्योऽयं देहे सर्वस्य भारत । तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥ स्वधर्ममपि चावेक्ष्य न विकं-

पितुमर्हसि । धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥३१॥ यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् । सुखिनः क्षत्रि-याः पार्थ लभंते युद्धमीदृशम् ॥ ३२ ॥ अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि । ततः स्वधर्मं कीर्तिं च हित्वा पापमवा-प्स्यसि ॥ ३३ ॥ अकीर्तिं चापि भूतानि कथयिष्यंति तेऽव्य-याम् । संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ३४ ॥ भया-द्रणादुपरतं मंस्यंते त्वां महारथाः । येषां च त्वं वहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥ अवाच्यवादांश्च वहून्वदि-ष्यंति तवाहिताः । निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु

किम् ॥ ३६ ॥ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे
महीम् । तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः ॥३७॥ सुख-
दुःखे समे कृत्वा लाभालाभौ जयाजयौ । ततो युद्धाय युज्य-
स्व नैवं पापमवाप्स्यसि ॥ ३८ ॥ एषा तेऽभिहिता सांख्ये
वुद्धिर्योगे त्विमां शृणु । वुद्ध्या युक्तो यया पार्थ कर्मवंधं
प्रहास्यसि ॥ ३९ ॥ नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न वि-
द्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥
व्यवसायात्मिका वुद्धिरेकेह कुरुनंदन । वहुशाखा ह्यनंताश्च
वुद्धयोऽव्यवसायिनाम् ॥४१॥ यामिमां पुष्पितां वाचं प्रवदन्त्य-

विपश्चितः । वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥४२॥ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् । क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥ भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् । व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन । निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५ ॥ यावानर्थ उदपाने सर्वतः संप्लुतोदके । तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६ ॥ कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ॥ ४७ ॥

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय । सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय । बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते । तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥ कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः । जन्मबन्धविनिर्मुक्ताः पदं गच्छंत्यनामयम् ॥ ५१ ॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गंतासि निर्वेदं श्रोतव्यस्य च श्रुतस्य च ॥ ५२ ॥ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला । समा-

धावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥ अर्जुन उवाच । स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव । स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥५४॥ श्रीभगवानुवाच । प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥५५॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् । नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥ यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः । इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रति-

ष्ठिता ॥ ५८ ॥ विषया विनिवर्तंते निराहारस्य देहिनः । रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥ यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः । इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ॥ ६० ॥ तानि सर्वाणि संयम्य युक्त आसीत मत्परः । वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते । संगात्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः । स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥ रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।

आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥ प्रसादे सर्वदुःखानां हानिरस्योपजायते । प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना । न चाभावयतः शांतिरशांतस्य कुतः सुखम् ॥ ६६ ॥ इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते । तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥ ६७ ॥ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः । इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥ आपूर्य-

माणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् । तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ॥ ७० ॥ विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः । निर्ममो निरहंकारः स शांतिमधिगच्छति ॥ ७१ ॥ एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति । स्थित्वास्यामंतकालेऽपि ब्रह्म निर्वाणमृच्छति ॥ ७२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्र० सांख्ययोगो नाम द्वितीयोऽध्यायः ॥ २ ॥

अर्जुन उवाच । ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन । तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥ व्यामि-

श्रेणेव वाक्येन बुद्धिं मोहयसीव मे । तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ २ ॥ श्रीभगवानुवाच । लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ । ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥ ३ ॥ न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते । न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् । कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥ कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् । इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥ यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जु-

न । कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ७ ॥ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः । शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥ ८ ॥ यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः । तदर्थं कर्म कौंतेय मुक्तसंगः समाचर ॥ ९ ॥ सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ १० ॥ देवान्भावयतानेन ते देवा भावयंतु वः । परस्परं भावयंतः श्रेयः परमवाप्स्यथ ॥ ११ ॥ इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः । तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः ॥ १२ ॥ यज्ञशि-

ष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः । भुंजते ते त्वघं पापा
ये पचंत्यात्मकारणात् ॥ १३ ॥ अन्नाद्भवंति भूतानि पर्जन्या-
दन्नसंभवः । यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् । तस्मात्सर्वगतं ब्रह्म
नित्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥ एवं प्रवर्तितं चक्रं नानुवर्तयतीह
यः । अघायुरिंद्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥ यस्त्वा-
त्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मन्येव च संतुष्ट-
स्तस्य कार्यं न विद्यते ॥ १७ ॥ नैव तस्य कृतेनार्थो नाकृ-
तेनेह कश्चन । न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

तस्मादसक्तः सततं कार्यं कर्म समाचर । असक्तो ह्याचर-न्कर्म परमाप्नोति पूरुषः ॥ १९ ॥ कर्मणैव हि संसिद्धिमा-स्थिता जनकादयः । लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥ २० ॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन । नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥ यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः । मम व-र्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥ २३ ॥ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् । संकरस्य च कर्ता स्यामुपह-

न्यामिमाः प्रजाः ॥ २४ ॥ सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत। कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥२५॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥ २७ ॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः। गुणा गुणेषु वर्तंत इति मत्त्वा न सज्जते ॥ २८ ॥ प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्मसु । तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् ॥ २९ ॥ मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।

निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥ ये मे मत-मिदं नित्यमनुतिष्ठंति मानवाः । श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः ॥ ३१ ॥ ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतम् । सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२ ॥ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥ इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ । तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ॥३४॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥ अर्जुन उवाच ।

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः । अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥३६॥ श्रीभगवानुवाच । काम एष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥ धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च । यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥ आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा । कामरूपेण कौंतेय दुष्पूरेणानलेन च ॥ ३९ ॥ इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते । एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥ तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ । पाप्मानं

प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥ इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥ एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना । जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्र० कर्मयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥

श्रीभगवानुवाच । इमं विवस्वते योगं प्रोक्तवानहमव्ययम् । विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥ एवं परंपराप्राप्तमिमं राजर्षयो विदुः । स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥ स एवायं मया तेऽद्य योगः प्रोक्तः पुरा-

तनः । भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥
अर्जुन उवाच । अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥ श्रीभग-
वानुवाच । बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५ ॥ अजोऽपि
सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् । प्रकृतिं स्वामधिष्ठाय
संभवाम्यात्ममायया ॥ ६ ॥ यदा यदा हि धर्मस्य ग्लानि-
र्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्
॥ ७ ॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्म-

संस्थापनार्थाय संभवामि युगे युगे ॥ ८ ॥ जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥ वीतरागभयक्रोधा मन्मया मामुपाश्रिताः । बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम् । मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥ ११ ॥ कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः । क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः । तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥ न मां

कर्माणि लिंपंति न मे कर्मफले स्पृहा । इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः । कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥ किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः । तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥ कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः । अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७॥ कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः । स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८॥ यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः । ज्ञानाग्निदग्धक-

र्माणं तमाहुः पंडितं बुधाः ॥ १९ ॥ त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः । कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥ २० ॥ निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः । शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥ यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः । समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२ ॥ गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः । यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥ ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥ दैवमेवापरे यज्ञं योगिनः पर्यु-

पासते । ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥ श्रोत्रा-
दीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति । शब्दादीन्विषयानन्य
इंद्रियाग्निषु जुह्वति ॥ २६ ॥ सर्वाणींद्रियकर्माणि प्राणकर्माणि
चापरे । आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे । स्वाध्यायज्ञानयज्ञाश्च
यतयः संशितव्रताः ॥ २८ ॥ अपाने जुह्वति प्राणं प्राणेऽपानं
तथापरे । प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥२९॥ अपरे
नियताहाराः प्राणान्प्राणेषु जुह्वति । सर्वेऽप्येते यज्ञविदो
यज्ञक्षपितकल्मषाः ॥ ३० ॥ यज्ञशिष्टामृतभुजो यांति ब्रह्म

सनातनम् । नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥ एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे । कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥ श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप । सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥ यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव । येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः । सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥ नहि ज्ञानेन सदृशं पवित्रमिह विद्यते । तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति ॥ ३८ ॥ श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेंद्रियः । ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति ॥ ३९ ॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति । नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥ योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् । आत्मवंतं न कर्माणि निबध्नंति धनंजय ॥ ४१ ॥ तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः । छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्र० कर्मब्रह्मार्पणयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

अर्जुन उवाच । संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि । यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥ श्रीभगवानुवाच । संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ । तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ २ ॥ ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति । निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ॥ ३ ॥ सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः । एकमप्यास्थितः सम्यगुभयोर्विंदते फलम् ॥ ४ ॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते । एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥ संन्यासस्तु

महाबाहो दुःखमाप्तुमयोगतः । योगयुक्तो मुनिर्ब्रह्म नचिरे-
णाधिगच्छति ॥ ६ ॥ योगयुक्तो विशुद्धात्मा विजितात्मा
जितेंद्रियः । सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥
नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् । पश्यञ्शृण्व-
न्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥ ८ ॥ प्रलपन्विसृजन्गृह्ण-
न्नुन्मिषन्निमिषन्नपि । इंद्रियाणींद्रियार्थेषु वर्तंत इति धार-
यन् ॥ ९ ॥ ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥ १० ॥ कायेन मन-
सा बुद्ध्या केवलैरिंद्रियैरपि । योगिनः कर्म कुर्वंति संगं

त्यक्त्वात्मशुद्धये ॥ ११ ॥ युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥ सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी । नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥ न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥१४॥ नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः । अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥१५॥ ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः । तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः । गच्छंत्यपुनरा-

वृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥ विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पंडिताः समदर्शिनः ॥ १८ ॥ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः । निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९ ॥ न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् । स्थिरबुद्धिरसंमूढो ब्रह्मवि-द्ब्रह्मणि स्थितः ॥ २० ॥ बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखम् । स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥ २१ ॥ ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यंतवंतः कौंतेय न तेषु रमते बुधः ॥ २२ ॥ शक्नोतीहैव यः सोढुं

प्राक्शरीरविमोक्षणात् । कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥ योऽन्तःसुखोऽन्तरारामस्तथांतर्ज्योतिरेव यः । स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ २४ ॥ लभंते ब्रह्म निर्वाणमृषयः क्षीणकल्मषाः । छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥ कामक्रोधवियुक्तानां यतीनां यतचेतसाम् । अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥ स्पर्शान्कृत्वा वहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः । प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ ॥ २७ ॥ यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः । विगतेच्छाभयक्रोधो यः

सदा मुक्त एव सः ॥ २८ ॥ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥२९॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्र० कर्मसंन्यासयोगो नाम पंचमोऽध्यायः ॥ ५ ॥

श्रीभगवानुवाच । अनाश्रितः कर्मफलं कार्यं कर्म करोति यः। स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥ यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव । न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते ॥३॥ यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते । सर्वसंकल्पसंन्यासी

योगारूढस्तदोच्यते ॥ ४ ॥ उद्धरेदात्मनात्मानं नात्मानमवसादयेत् । आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ॥ ५ ॥ बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः । अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥ जितात्मनः प्रशांतस्य परमात्मा समाहितः । शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥ ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः । युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥ ८ ॥ सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु । साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥ योगी युंजीत सततमात्मानं रहसि

स्थितः । एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १० ॥
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः । नात्युच्छ्रितं नाति-
नीचं चैलाजिनकुशोत्तरम् ॥ ११ ॥ तत्रैकाग्रं मनः कृत्वा
यतचित्तेंद्रियक्रियः । उपविश्यासने युंज्याद्योगमात्मविशुद्धये
॥ १२ ॥ समं कायशिरोग्रीवं धारयन्नचलं स्थिरः । संप्रेक्ष्य
नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥ प्रशांतात्मा
विगतभीर्ब्रह्मचारिव्रते स्थितः । मनः संयम्य मच्चित्तो युक्त
आसीत मत्परः ॥ १४ ॥ युंजन्नेवं सदात्मानं योगी नियत-
मानसः । शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥

नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः । न चातिस्वप्न-
शीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥ युक्ताहारविहारस्य युक्त-
चेष्टस्य कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा
॥ १७ ॥ यदा विनियतं चित्तमात्मन्येवावतिष्ठते । निःस्पृहः
सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥ यथा दीपो निवा-
तस्थो नेंगते सोपमा स्मृता । योगिनो यतचित्तस्य युंजतो
योगमात्मनः ॥ १९ ॥ यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥ सुखमा-
त्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियम् । वेत्ति यत्र न चैवायं स्थित-

श्चलति तत्त्वतः ॥ २१ ॥ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः । यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥ तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् । स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा ॥ २३ ॥ संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः । मनसैवेंद्रियग्रामं विनियम्य समंततः ॥ २४ ॥ शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया । आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥२५॥ यतो यतो निश्चरति मनश्चंचलमस्थिरम् । ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥ प्रशांतमनसं ह्येनं योगिनं

सुखमुत्तमम् । उपैति शांतरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥
युंजन्नेवं सदात्मानं योगी विगतकल्मषः । सुखेन ब्रह्मसंस्पर्श-
मत्यंतं सुखमश्नुते ॥ २८ ॥ सर्वभूतस्थमात्मानं सर्वभूतानि
चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं न प्रण-
श्यामि स च मे न प्रणश्यति ॥ ३० ॥ सर्वभूतस्थितं यो मां
भजत्येकत्वमास्थितः । सर्वथा वर्तमानोपि स योगी मयि
वर्तते ॥ ३१ ॥ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥

अर्जुन उवाच । योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिराम् ॥ ३३ ॥
चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् । तस्याहं निग्रहं मन्ये
वायोरिव सुदुष्करम् ॥ ३४ ॥ श्रीभगवानुवाच । असं-
शयं महाबाहो मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौंतेय
वैराग्येण च गृह्यते ॥ ३५ ॥ असंयतात्मना योगो दुष्प्राप
इति मे मतिः । वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः
॥ ३६ ॥ अर्जुन उवाच । अयतिः श्रद्धयोपेतो योगाच्चलित-
मानसः । अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥३७॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति । अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥ एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः । त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९ ॥ श्रीभगवानुवाच । पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते । नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४० ॥ प्राप्य पुण्यकृताँल्लोकानुषित्वा शाश्वतीः समाः । शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥ अथवा योगिनामेव कुले भवति धीमताम् । एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।

यतते च ततो भूयः संसिद्धौ कुरुनंदन ॥ ४३ ॥ पूर्वाभ्या-
सेन तेनैव ह्रियते ह्यवशोऽपि सः । जिज्ञासुरपि योगस्य
शब्दब्रह्मातिवर्तते ॥ ४४ ॥ प्रयत्नाद्यतमानस्तु योगी संशुद्ध-
किल्बिषः । अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥४५॥
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः । कर्मि-
भ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥ योगिना-
मपि सर्वेषां मद्गतेनांतरात्मना । श्रद्धावान्भजते यो मां स मे
युक्ततमो मतः ॥ ४७ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्र० आत्मसंयमयोगो नाम षष्ठोऽध्यायः ॥ ६ ॥

श्रीभगवानुवाच । मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः । असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥ ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः । यज्ज्ञात्वा नेह भूयोऽन्य-ज्ज्ञातव्यमवशिष्यते ॥ २ ॥ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥५॥ एतद्योनीनि भूतानि सर्वाणीत्युपधारय । अहं कृत्स्नस्य

जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥ मत्तः परतरं नान्यत्किं-चिदस्ति धनंजय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥ रसोऽहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः । प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥ पुण्यो गंधः पृथिव्यां च तेजश्चास्मि विभावसौ । जीवनं सर्वभूतेषु तपश्चास्मि तप-स्विषु ॥ ९ ॥ बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् । बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥ बलं बल-वतामस्मि कामरागविवर्जितम् । धर्माविरुद्धो भूतेषु कामो-ऽस्मि भरतर्षभ ॥ ११ ॥ ये चैव सात्विका भावा राजसास्ता-

मसाश्च ये । मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥१२॥
त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् । मोहितं नाभिजा-
नाति मामेभ्यः परमव्ययम् ॥ १३ ॥ दैवी ह्येषा गुणमयी
मम माया दुरत्यया । मामेव ये प्रपद्यंते मायामेतां तरंति ते
॥ १४ ॥ न मां दुष्कृतिनो मूढाः प्रपद्यंते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥ चतुर्विधा
भजंते मां जनाः सुकृतिनोऽर्जुन । आर्तो जिज्ञासुरर्थार्थी
ज्ञानी च भरतर्षभ ॥ १६ ॥ तेषां ज्ञानी नित्ययुक्त एकभक्ति-
र्विशिष्यते । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः

॥ १७ ॥ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥ १८ ॥
बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते । वासुदेवः सर्वमिति
स महात्मा सुदुर्लभः ॥ १९ ॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यं-
तेऽन्यदेवताः । तं तं नियममास्थाय प्रकृत्या नियताः स्वया
॥ २० ॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ २१ ॥ स
तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामा-
न्मयैव विहितान्हि तान् ॥ २२ ॥ अंतवत्तु फलं तेषां तद्भव-

त्यल्पमेधसाम् । देवान्देवयजो यांति मद्भक्ता यांति मामपि ॥ २३ ॥ अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः । परं भावमजानंतो ममाव्ययमनुत्तमम् ॥ २४ ॥ नाहं प्रकाशः सर्वस्य योगमायासमावृतः । मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥ वेदाहं समतीतानि वर्तमानानि चार्जुन । भविष्याणि च भूतानि मां तु वेद न कश्चन ॥२६॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत । सर्वभूतानि संमोहं सर्गे यांति परंतप ॥२७॥ येषां त्वंतगतं पापं जनानां पुण्यकर्मणाम् । ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः ॥ २८ ॥

जरामरणमोक्षाय मामाश्रित्य यतंति ये । ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥ साधिभूताधिदैवं मां साधियज्ञं च ये विदुः । प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ३० ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्र० ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ॥ ७ ॥

अर्जुन उवाच । किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम । अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥ अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन । प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥ श्रीभगवानुवाच । अक्षरं ब्रह्म

परमं स्वभावोऽध्यात्ममुच्यते। भूतभावोद्भवकरो विसर्गः कर्म-संज्ञितः ॥ ३ ॥ अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्। अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४ ॥ अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरम्। यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥ यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरम्। तं तमेवैति कौंतेय सदा तद्भावभावितः ॥ ६ ॥ तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च। मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम् ॥ ७ ॥ अभ्यासयोगयुक्तेन चेतसा नान्य-गामिना। परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ॥ ८ ॥

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः । सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ॥ ९ ॥ प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव । भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्स तं परं पुरुषमुपैति दिव्यम् ॥१०॥ यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः । यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च । मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥ १२ ॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । यः प्रयाति त्यजन्देहं स याति परमां

गतिम् ॥ १३ ॥ अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥ मामु-
पेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवंति महात्मानः
संसिद्धिं परमां गताः ॥ १५ ॥ आब्रह्मभुवनाल्लोकाः पुनरा-
वर्तिनोऽर्जुन । मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते ॥१६॥
सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः । रात्रिं युगसहस्रान्तां
तेऽहोरात्रविदो जनाः ॥ १७ ॥ अव्यक्ताद्व्यक्तयः सर्वाः प्रभ-
वंत्यहरागमे । रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥
भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते । रात्र्यागमेऽवशः

पार्थ प्रभवत्यहरागमे || १९ || परस्तस्मात्तु भावोऽन्योऽव्यक्तो व्यक्तात्सनातनः । यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति || २० || अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्तंते तद्धाम परमं मम || २१ || पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यस्यांतःस्थानि भूतानि येन सर्वमिदं ततम् || २२ || यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ || २३ || अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ||२४|| धूमो रात्रिस्तथा

कृष्णः षण्मासा दक्षिणायनम् । तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५ ॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते । एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः ॥ २६ ॥ नैते सृती पार्थ जानन्योगी मुह्यति कश्चन । तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥ वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् । अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥ २८ ॥

इति श्रीमद्भगवद्गीता० योगशास्त्रेऽक्षरब्रह्मयोगो नामाष्टमोऽध्यायः ॥ ८ ॥

श्रीभगवानुवाच । इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे । ज्ञानं

विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥ राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् । प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तु-मव्ययम् ॥ २ ॥ अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप । अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३ ॥ मया तत-मिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥ न च मत्स्थानि भूतानि पश्य मे योगमै-श्वरम् । भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥ यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् । तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥ सर्वभूतानि कौंतेय प्रकृतिं

यांति मामिकाम् । कल्पक्षये पुनस्तानि कल्पादौ विसृजा-
म्यहम् ॥ ७ ॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥ न च मां
तानि कर्माणि निबध्नंति धनंजय । उदासीनवदासीनमसक्तं
तेषु कर्मसु ॥ ९ ॥ मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौंतेय जगद्विपरिवर्तते ॥ १० ॥ अवजानंति मां
मूढा मानुषीं तनुमाश्रितम् । परं भावमजानंतो मम भूतमहे-
श्वरम् ॥ ११ ॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥ महा-

त्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः । भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥ सततं कीर्तयंतो मां यतंतश्च दृढव्रताः । नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते ॥१४॥ ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते । एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥ अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् । मंत्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥ पिताहमस्य जगतो माता धाता पितामहः । वेद्यं पवित्रमोंकार ऋक् साम यजुरेव च ॥ १७ ॥ गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् । प्रभवः प्रलयः स्थानं निधानं बीज-

मव्ययम् ॥ १८ ॥ तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च । अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥ त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते । ते पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यान्दिवि देवभोगान् ॥ २० ॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति । एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभंते ॥ २१ ॥ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥ येऽप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः । तेऽपि मामेव कौंतेय यजंत्यविधिपूर्व-

कम् ॥ २३ ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥ २४ ॥ यांति देवव्रता देवान् पितृन्यांति पितृव्रताः । भूतानि यांति भूतेज्या यांति मद्याजिनोऽपि माम् ॥ २५ ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः । संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥ समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २९ ॥

अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः ॥३०॥ क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति । कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥ मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पाप-योनयः । स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यांति परां गतिम् ॥ ३२ ॥ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा । अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥

इति श्रीमद्भगवद्गीता० राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥ ९ ॥

श्रीभगवानुवाच । भूय एव महाबाहो शृणु मे परमं वचः । यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया॥ १ ॥ न मे विदुः सुरगणाः प्रभवं न महर्षयः । अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥ यो मामजमनादिं च वेत्ति लोकमहेश्वरम् । असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥ बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः । सुखं दुःखं भवो भावो भयं चाभयमेव च ॥ ४ ॥ अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवंति भावा भूतानां मत्त एव पृथग्विधाः ॥५॥ महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा । मद्भावा मानसा जाता

येषां लोक इमाः प्रजाः ॥ ६ ॥ एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः । सोऽविकंपेन योगेन युज्यते नात्र संशयः ॥ ७ ॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते । इति मत्वा भजंते मां बुधा भावसमन्विताः ॥ ८ ॥ मच्चित्ता मद्गतप्राणा बोधयंतः परस्परम् । कथयंतश्च मां नित्यं तुष्यंति च रमंति च ॥ ९ ॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयांति ते ॥ १० ॥ तेषामेवानुकंपार्थ-महमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥ अर्जुन उवाच । परं ब्रह्म परं धाम पवित्रं

परमं भवान् । पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥१२॥ आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा । असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥ सर्वमेतदृतं मन्ये यन्मां वदसि केशव । नहि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम । भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः । याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥ कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन् । केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥ १७ ॥ विस्तरेणात्मनो

योगं विभूतिं च जनार्दन । भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥ १८ ॥ श्रीभगवानुवाच । हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः । प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे ॥ १९ ॥ अहमात्मा गुडाकेश सर्वभूताशयस्थितः । अहमादिश्च मध्यं च भूतानामंत एव च ॥ २० ॥ आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् । मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१ ॥ वेदानां सामवेदोऽस्मि देवानामस्मि वासवः । इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥ रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम् ।

वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥ २३॥ पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् । सेनानीनामहं स्कंदः सरसामस्मि सागरः ॥ २४ ॥ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् । यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥२५॥ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः । गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६ ॥ उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् । ऐरावतं गजेंद्राणां नराणां च नराधिपम् ॥ २७ ॥ आयुधानामहं वज्रं धेनूनामस्मि कामधुक् । प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः ।

॥ २८ ॥ अनंतश्चास्मि नागानां वरुणो यादसामहम् । पितॄणा-
मर्यमा चास्मि यमः संयमतामहम् ॥ २९ ॥ प्रह्लादश्चास्मि
दैत्यानां कालः कलयतामहम् । मृगाणां च मृगेंद्रोऽहं वैन-
तेयश्च पक्षिणाम् ॥ ३० ॥ पवनः पवतामस्मि रामः शस्त्रभृ-
तामहम् । झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥३१॥
सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन । अध्यात्मविद्या
विद्यानां वादः प्रवदतामहम् ॥ ३२ ॥ अक्षराणामकारोऽस्मि
द्वंद्वः सामासिकस्य च । अहमेवाक्षयः कालो धाताऽहं विश्व-
तोमुखः ॥ ३३ ॥ मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।

कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥ बृहत्साम तथा साम्नां गायत्री छंदसामहम् । मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५ ॥ द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् । जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥ वृष्णीनां वासुदेवोऽस्मि पांडवानां धनंजयः । मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥ दंडो दमयतामस्मि नीतिरस्मि जिगीषताम् । मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥ यच्चापि सर्वभूतानां बीजं तदहमर्जुन । न तदस्ति विना यत्स्यान्मया भूतं चरा-

चरम् ॥ ३९ ॥ नांतोऽस्ति मम दिव्यानां विभूतीनां परंतप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥ यद्यद्विभू-
तिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंऽ-
शसंभवम् ॥ ४१ ॥ अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४२ ॥

इति श्रीमद्भगवद्गीता० विभूतियोगो नाम दशमोऽध्यायः ॥ १० ॥

अर्जुन उवाच । मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥ १ ॥ भवाप्ययौ
हि भूतानां श्रुतौ विस्तरशो मया । त्वत्तः कमलपत्राक्ष माहा-

त्म्यमपि चाव्ययम् ॥ २ ॥ एवमेतद्यथात्थ त्वमात्मानं परमेश्वर । द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो । योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥ श्रीभगवानुवाच । पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः । नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा । बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥ इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् । मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥ न तु मां शक्यसे द्रष्टुमनेनैव

स्वचक्षुषा । दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥८॥ संजय उवाच । एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः । दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९ ॥ अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् । अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥१०॥ दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनम् । सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखम् ॥ ११ ॥ दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता । यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥ तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा । अपश्यद्देवदेवस्य शरीरे पांडवस्तदा ॥ १३ ॥ ततः स विस्म-

याविष्टो हृष्टरोमा धनंजयः। प्रणम्य शिरसा देवं कृतांजलिरभाषत ॥ १४ ॥ अर्जुन उवाच । पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् । ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥ १५ ॥ अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनंतरूपम् । नांतं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूपम् ॥ १६ ॥ किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमंतम् । पश्यामि त्वां दुर्निरीक्ष्यं समंताद् दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥ त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।

त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १८॥
अनादिमध्यांतमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रम् । पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपंतम् ॥ १९ ॥
द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः । दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ २०॥
अमी हि त्वां सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति । स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥ रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च । गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां

विस्मिताश्चैव सर्वे ॥ २२ ॥ रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ॥ बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥ २३ ॥ नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् । दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि शमं च विष्णो ॥ २४ ॥ दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसंनिभानि । दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः । भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥ वक्त्राणि

ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि । केचिद्वि-
लग्ना दशनांतरेषु संदृश्यंते चूर्णितैरुत्तमांगैः ॥ २७ ॥ यथा
नदीनां बहवोंऽबुवेगाः समुद्रमेवाभिमुखा द्रवंति । तथा त-
वामी नरलोकवीरा विशंति वक्राण्यभिविज्वलंति ॥ २८ ॥
यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशंति लोकास्तवापि वक्राणि समृद्धवेगाः
॥ २९ ॥ लेलिह्यसे ग्रसमानः समंताल्लोकान्समग्रान्वदनैर्ज्व-
लद्भिः । तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति
विष्णो ॥ ३० ॥ आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते

देववर प्रसीद । विज्ञातुमिच्छामि भवंतमाद्यं न हि प्रजानामि तव प्रवृत्तिम् ॥ ३१ ॥ श्रीभगवानुवाच । कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः । ऋतेऽपि त्वां नभविष्यंति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ ॥ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धम् । मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् । मया हतांस्त्वं जहि मा व्यथिष्ठा युद्ध्यस्व जेतासि रणे सपत्नान् ॥ ३४ ॥ संजय उवाच । एतच्छ्रुत्वा व-

चनं केशवस्य कृतांजलिर्वेपमानः किरीटी । नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥ ३५ ॥ अर्जुन उवाच । स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च । रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघाः ॥ ३६ ॥ कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे । अनंत देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥ त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् । वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनंतरूप ॥ ३८ ॥ वायुर्यमोऽग्निर्वरुणः शशांकः प्रजाप-

तिस्त्वं प्रपितामहश्च । नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९ ॥ नमः पुरस्तादथ पृष्ठतस्ते न-मोऽस्तु ते सर्वत एव सर्व । अनंतवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥ ४० ॥ सखेति मत्वा प्रसभं य-दुक्तं हे कृष्ण हे यादव हे सखेति । अजानता महिमानं त-वेदं मया प्रमादात्प्रणयेन वापि ॥ ४१ ॥ यच्चावहासार्थमस-त्कृतोऽसि विहारशय्यासनभोजनेषु । एकोऽथवाप्यच्युत त-त्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥ ४२ ॥ पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् । न त्वत्समोऽस्त्य-

भ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव: ॥ ४३ ॥
तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम्
॥ ४४ ॥ अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो
मे। तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास॥ ४५ ॥
किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव । ते-
नैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥
श्रीभगवानुवाच । मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शित-
मात्मयोगात् । तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न

दृष्टपूर्वम् ॥ ४७ ॥ न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः । एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८ ॥ मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम् । व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥ संजय उवाच । इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः । आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ५० ॥ अर्जुन उवाच । दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन । इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ५१ ॥ श्रीभगवानुवाच ।

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम । देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ॥ ५२ ॥ नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३ ॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ५४ ॥ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः । निर्वैरः सर्वभूतेषु यः स मामेति पांडव ॥ ५५ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु० विश्वरूपदर्शनयोगो नामैकादशोऽध्यायः ॥ ११ ॥

अर्जुन उवाच । एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥ श्रीभगवा-

नुवाच । मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते । श्रद्ध-
या परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥ ये त्वक्षरमनिर्दे-
श्यमव्यक्तं पर्युपासते । सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवम्
॥ ३ ॥ संनियम्यैंद्रियग्रामं सर्वत्र समबुद्धयः । ते प्राप्नुवंति
मामेव सर्वभूतहिते रताः ॥ ४ ॥ क्लेशोऽधिकतरस्तेषामव्य-
क्तासक्तचेतसाम् । अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते
॥ ५ ॥ ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः । अन-
न्येनैव योगेन मां ध्यायंत उपासते ॥ ६ ॥ तेषामहं समुद्धर्ता
मृत्युसंसारसागरात् । भवामि नचिरात्पार्थ मय्यावेशितचे-

तसाम् ॥ ७ ॥ मय्येव मन आधत्स्व मयि बुद्धिं निवेशय। निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥ अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् । अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥ ९ ॥ अभ्यासेऽप्यसमर्थोऽसि मत्कर्म-परमो भव । मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि॥ १०॥ अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः । सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥ श्रेयो हि ज्ञानमभ्यासाज्ज्ञा-नाद्ध्यानं विशिष्यते । ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनं-तरम् ॥ १२ ॥ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च । नि-

र्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३ ॥ संतुष्टः सततं योगी यतात्मा दृढनिश्चयः । मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ॥ १४ ॥ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः । हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥ अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः । सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥ यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति । शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १७ ॥ समः शत्रौ च मित्रे च तथा मानापमानयोः । शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥ १८ ॥ तुल्यनिंदा-

स्तुतिर्मौनी संतुष्टो येनकेनचित् । अनिकेतः स्थिरमतिर्भक्ति-मान्मे प्रियो नरः || १९ || ये तु धर्म्यामृतमिदं यथोक्तं प-र्युपासते । श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः|| २०||

इति श्रीमद्भगवद्गीता० भक्तियोगो नाम द्वादशोऽध्यायः || १२ ||

अर्जुन उवाच । [प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च । एत-द्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव || १ ||] श्रीभगवानु-वाच । इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते । एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः || १ || क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत । क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम|| २||

तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् । स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥ ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक् । ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४ ॥ महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च । इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥ ५ ॥ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः । एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६ ॥ अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवम् । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥ इंद्रियार्थेषु वैराग्यमनहंकार एव च ॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्श-

नम् ॥ ८ ॥ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु । नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १० ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११ ॥ ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते । अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥ सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥ सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितम् । असक्तं सर्वभृच्चैव

निर्गुणं गुणभोक्तृ च ॥ १४ ॥ बहिरंतश्च भूतानामचरं चरमेव च। सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् ॥ १५ ॥ अविभक्तं च भूतेषु विभक्तमिव च स्थितम्। भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते। ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम् ॥ १७ ॥ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः। मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥ प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि। विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ १९ ॥ कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्य-

ते । पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥ पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् । कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥ उपद्रष्टानुमंता च भर्ता भोक्ता महेश्वरः । परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥ २२ ॥ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह । सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥ ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना । अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ २४ ॥ अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते । तेऽपि चातितरंत्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

यावत्संजायते किंचित्सत्त्वं स्थावरजंगमम् । क्षेत्रक्षेत्रज्ञसंयो-
गात्तद्विद्धि भरतर्षभ ॥ २६ ॥ समं सर्वेषु भूतेषु तिष्ठंतं पर-
मेश्वरम् । विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति ॥ २७ ॥
समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् । न हिनस्त्यात्मना-
त्मानं ततो याति परां गतिम् ॥ २८ ॥ प्रकृत्यैव च कर्माणि
क्रियमाणानि सर्वशः । यः पश्यति तथात्मानमकर्तारं स प-
श्यति ॥ २९ ॥ यदा भूतपृथग्भावमेकस्थमनुपश्यति । तत
एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३० ॥ अनादित्वान्नि-
र्गुणत्वात्परमात्मायमव्ययः । शरीरस्थोऽपि कौंतेय न करोति

न लिप्यते ॥ ३१ ॥ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते । सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३२ ॥ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३ ॥ क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा । भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परम् ॥ ३४ ॥

इति श्रीमद्भगवद्गीता० क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीभगवानुवाच । परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् । यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १ ॥ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजा-

यंते प्रलये न व्यथंति च ॥ २ ॥ मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् । संभवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥ सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः । तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥ सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः । निबध्नंति महाबाहो देहे देहिनमव्ययम् ॥ ५ ॥ तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् । सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ॥ ६ ॥ रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवम् । तन्निबध्नाति कौंतेय कर्मसंगेन देहिनम् ॥ ७ ॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् । प्रमादालस्यनि-

द्राभिस्तन्निबध्नाति भारत ॥ ८ ॥ सत्त्वं सुखे संजयति रजः कर्मणि भारत । ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥ रजस्तमश्चाभिभूय सत्त्वं भवति भारत । रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥ १० ॥ सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते । ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥ ११ ॥ लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा । रजस्येतानि जायंते विवृद्धे भरतर्षभ ॥ १२ ॥ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च । तमस्येतानि जायंते विवृद्धे कुरुनंदन ॥ १३ ॥ यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् । तदोत्तमविदां

लोकानमलान्प्रतिपद्यते ॥ १४ ॥ रजसि प्रलयं गत्वा कर्मसं-
गिषु जायते । तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥
कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् । रजसस्तु फलं
दुःखमज्ञानं तमसः फलम् ॥ १६ ॥ सत्त्वात्संजायते ज्ञानं र-
जसो लोभ एव च । प्रमादमोहौ तमसो भवतोऽज्ञानमेव
च ॥ १७ ॥ ऊर्ध्वं गच्छंति सत्त्वस्था मध्ये तिष्ठंति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छंति तामसाः ॥ १८ ॥ नान्यं
गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति । गुणेभ्यश्च परं वेत्ति म-
द्भावं सोऽधिगच्छति ॥ १९ ॥ गुणानेतानतीत्य त्रीन्देही दे-

हसमुद्भवान् । जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥ अर्जुन उवाच । कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो । किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥ २१ ॥ श्रीभगवानुवाच । प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव । न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ २२ ॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते । गुणा वर्तंत इत्येव योऽवतिष्ठति नेंगते ॥ २३ ॥ समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः । तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः ॥ २४ ॥ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः । सर्वारंभपरित्या-

गी गुणातीतः स उच्यते ॥ २५ ॥ मां च योऽव्यभिचारेण भ-
क्तियोगेन सेवते । स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते
॥ २६ ॥ ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वत-
स्य च धर्मस्य सुखस्यैकांतिकस्य च ॥ २७ ॥

इति श्रीमद्भगवद्गीता० गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीभगवानुवाच । ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥ अधश्चो-
र्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः । अधश्च
मूलान्यनुसंततानि कर्मानुवंधीनि मनुष्यलोके ॥ २ ॥ न रू-

पमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा । अश्व-
त्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्त्वा ॥ ३ ॥ ततः
पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तंति भूयः । तमेव
चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥ नि-
र्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययं तत्
॥ ५ ॥ न तद्भासयते सूर्यो न शशांको न पावकः । यद्गत्वा
न निवर्तंते तद्धाम परमं मम ॥ ६ ॥ ममैवांशो जीवलोके
जीवभूतः सनातनः । मनःषष्ठानींद्रियाणि प्रकृतिस्थानि क-

र्षति ॥ ७ ॥ शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः । गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ॥ ८ ॥ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च । अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥ उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितम् । विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः ॥ १० ॥ यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितम् । यतंतोऽप्यकृतात्मानो नैनं पश्यंत्यचेतसः ॥ ११ ॥ यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १२ ॥ गामाविश्य च भूतानि धारयाम्यहमोजसा ।

पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४ ॥ सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च । वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहम् ॥ १५ ॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १६ ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः ॥ १७ ॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्र-

थितः पुरुषोत्तमः ॥ १८ ॥ यो मामेवमसंमूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ । एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥ २० ॥

इति श्रीमद्भगवद्गीतासू॰ पुरुषोत्तमयोगो नाम पंचदशोऽध्यायः ॥ १५ ॥

श्रीभगवानुवाच । अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥ अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनम् । दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २ ॥ तेजः क्षमा धृतिः शौचमद्रोहो ना-

तिमानिता । भवंति संपदं दैवीमभिजातस्य भारत ॥ ३ ॥ दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च । अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ ४ ॥ दैवी संपद्विमोक्षाय निबंधायासुरी मता । मा शुचः संपदं दैवीमभिजातोऽसि पांडव ॥ ५ ॥ द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च । दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥ प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः । न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ ८ ॥ एतां दृ-

ष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ९ ॥ काममाश्रित्य दुष्पूरं दंभमानमदान्विताः । मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तंतेऽशुचिव्रताः ॥ १० ॥ चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः । कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११ ॥ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः । ईहंते कामभोगार्थमन्यायेनार्थसंचयान् ॥ १२ ॥ इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १३ ॥ असौ मया हतः शत्रुर्हनिष्ये चापरानपि । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥१४॥

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया । यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ १५ ॥ अनेकचित्तविभ्रांता मोहजालसमावृताः । प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ ॥ १६ ॥ आत्मसंभाविताः स्तब्धा धनमानमदान्विताः। यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकम् ॥ १७ ॥ अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः । मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः ॥ १८ ॥ तानहं द्विषतः क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव

कौंतेय ततो यांत्यधमां गतिम् ॥ २० ॥ त्रिविधं नरकस्येदं
द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं
त्यजेत् ॥ २१ ॥ एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ २२ ॥ यः
शास्त्रविधिमुत्सृज्य वर्तते कामकारतः । न स सिद्धिमवा-
प्नोति न सुखं न परां गतिम् ॥ २३ ॥ तस्माच्छास्त्रं प्रमाणं
ते कार्याकार्यव्यवस्थितौ । ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तु-
मिहार्हसि ॥ २४ ॥

इति श्रीमद्भगवद्गीतासू॰ दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः ॥ १६ ॥

अर्जुन उवाच । ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः । तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥ १ ॥ श्रीभगवानुवाच । त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा । सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥ सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत । श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥ ३ ॥ यजंते सात्त्विका देवान्यक्षरक्षांसि राजसाः । प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ॥ ४ ॥ अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः । दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥ कर्षयंतः शरीरस्थं भूत-

ग्राममचेतसः । मां चैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥ आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः । यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७ ॥ आयुःसत्त्वबलारोग्यसुखप्रीतिविर्धनाः । रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ ८ ॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः । आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥ यातयामं गतरसं पूति पर्युषितं च यत् । उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥ अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्त्विकः

॥ ११ ॥ अभिसंधाय तु फलं दंभार्थमपि चैव यत् । इज्यते
भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥ विधिहीनमसृष्टान्नं
मंत्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते
॥ १३ ॥ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् । ब्रह्मचर्यम-
हिंसा च शारीरं तप उच्यते ॥ १४ ॥ अनुद्वेगकरं वाक्यं
सत्यं प्रियहितं च यत् । स्वाध्यायाभ्यसनं चैव वाङ्मयं तप
उच्यते ॥ १५ ॥ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६ ॥ श्रद्धया परया
तप्तं तपस्तत्त्रिविधं नरैः । अफलाकांक्षिभिर्युक्तैः सात्त्विकं प-

रिचक्षते ॥ १७ ॥ सत्कारमानपूजार्थं तपो दंभेन चैव यत् । क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८ ॥ मूढग्राहेणात्मनो यत्पीडया क्रियते तपः । परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥ दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥ यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः । दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥ २१ ॥ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥ ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः । ब्राह्मणास्तेन

वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्तंते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४ ॥ तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः । दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः ॥ २५ ॥ सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते । प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६ ॥ यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते । कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८ ॥

इति श्रीमद्भगवद्गीता॰ श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥ १७ ॥

अर्जुन उवाच । संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदि-तुम् । त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥ श्रीभगवानुवाच । काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः । सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥ त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः । यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ ३ ॥ निश्चयं शृणु मे तत्र त्यागे भरतसत्तम । त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥ ४ ॥ यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५ ॥ एतान्यपि तु कर्माणि संगं त्य-

क्त्वा फलानि च । कर्तव्यानीति मे पार्थ निश्चितं मतमुत्त-
मम् ॥ ६ ॥ नियतस्य तु संन्यासः कर्मणो नोपपद्यते । मोहा-
त्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७ ॥ दुःखमित्येव य-
त्कर्म कायक्लेशभयात्त्यजेत् । स कृत्वा राजसं त्यागं नैव त्या-
गफलं लभेत् ॥ ८ ॥ कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥ ९ ॥ न
द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते । त्यागी सत्वसमाविष्टो
मेधावी छिन्नसंशयः ॥ १० ॥ नहि देहभृता शक्यं त्यक्तुं क-
र्माण्यशेषतः । यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् । भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥ १२ ॥ पंचैतानि महाबाहो कारणानि निबोध मे । सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३ ॥ अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् । विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमम् ॥ १४ ॥ शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः । न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः ॥ १५ ॥ तत्रैवं सति कर्तारमात्मानं केवलं तु यः । पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६ ॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते । हत्वापि स इ-

माँल्लोकान्न हंति न निबध्यते ॥ १७ ॥ ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना । करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥ ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः । प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥ सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ २० ॥ पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् । वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥ यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् । अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२ ॥ नियतं संगरहितम-

रागद्वेषतः कृतम् । अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ २३ ॥ यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः । क्रियते वहुलायासं तद्राजसमुदाहृतम् ॥ २४ ॥ अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषम् । मोहादारभ्यते कर्म तत्तामसमुदाहृतम् ॥ २५ ॥ मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥ २६ ॥ रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः । हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥ अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः । विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु । प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥ २९ ॥ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये । बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥ ३० ॥ यया धर्ममधर्मं च कार्यं चाकार्यमेव च । अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥ अधर्मं धर्ममिति या मन्यते तमसा वृता । सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥ धृत्या यया धारयते मनःप्राणेंद्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ ३३ ॥ यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन । प्रसंगेन

फलाकांक्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥ यया स्वप्नं भयं शोकं विषादं मदमेव च । न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥ सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ । अभ्यासाद्रमते यत्र दुःखांतं च निगच्छति ॥ ३६ ॥ यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥ विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् । परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥ यदग्रे चानुबंधे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९ ॥ न तदस्ति पृथिव्यां

वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्रिभिर्गुणैः ॥ ४० ॥ ब्राह्मणक्षत्रियविशां शूद्राणां च परतप । कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥ शमो दमस्तपः शौचं क्षांतिरार्जवमेव च । ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ ४२ ॥ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् । दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ४३ ॥ कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् । परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ४४ ॥ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः सिद्धिं यथा

विंदति तच्छृणु ॥ ४५ ॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ॥ ४६ ॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात । स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ ४७ ॥ सहजं कर्म कौंतेय सदोषमपि न त्यजेत् । सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥ असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः । नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९ ॥ सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे । समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥ बुद्ध्या विशुद्धया युक्तो धृ-

त्यात्मानं नियम्य च । शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः । ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ॥ ५३ ॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥ ५५ ॥ सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः । मत्प्रसादादवाप्नोति शाश्वतं पदम-

व्ययम् ॥ ५६ ॥ चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः । बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥ मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि । अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ॥ ५८ ॥ यदहंकारमाश्रित्य न योत्स्य इति मन्यसे । मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥ स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा । कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥ ६० ॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ॥ ६१ ॥ तमेव शरणं गच्छ सर्वभावेन भारत ।

तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥ इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया । विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥ सर्वगुह्यतमं भूयः शृणु मे परमं वचः । इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥ इदं ते नातपस्काय नाभक्ताय कदाचन । न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥६७॥

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति । भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः । भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥ अध्येष्यते च य इमं धर्म्यं संवादमावयोः । ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥ श्रद्धा-वाननसूयश्च शृणुयादपि यो नरः । सोऽपि मुक्तः शुभाँल्लो-कान् प्राप्नुयात्पुण्यकर्मणाम् ॥ ७१ ॥ कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा । कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय

॥ ७२ ॥ अर्जुन उवाच ॥ नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसा-
दान्मयाच्युत। स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥७३॥
संजय उवाच ॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः।
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४ ॥ व्यासप्रसादा-
च्छ्रुतवानेतद्गुह्यमहं परम्। योगं योगेश्वरात्कृष्णात्साक्षात्क-
थयतः स्वयम् ॥ ७५ ॥ राजन्संस्मृत्य संस्मृत्य संवादमिमम-
द्भुतम्। केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥
तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः। विस्मयो मे महान्
राजन् हृष्यामि च पुनः पुनः ॥ ७७ ॥ यत्र योगेश्वरः कृष्णो

यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयोगो नामाष्टादशोऽध्यायः ॥ १८ ॥

इदं पुस्तकं मुंबय्यां निर्णयसागरांकनालयाधिपतिभिः पांडुरंग जावजी इत्येतैः स्वीये मुद्रणालयेंऽकयित्वा प्रसिद्धिं नीतम् ॥

शकाब्दाः १८४३, सनाब्दाः १९२१.

पब्लिशर—पांडुरंग जावजी,
प्रिन्टर—रामचंद्र येसू शेडगे.

निर्णयसागर प्रेस, नंवर २३
कोलभाटलेन, मुंबई.

॥ अथ श्रीविष्णुसहस्रनामप्रारंभः ॥

श्रीगणेशाय नमः ॥ श्रीगोपालकृष्णाय नमः ॥ यस्य स्मरण-मात्रेण जन्मसंसारबंधनात् ॥ विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ १ ॥ वैशंपायन उवाच ॥ श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः। युधिष्ठिरः शांतनवं पुनरेवाभ्यभाषत ॥ २ ॥ युधिष्ठिर उवाच ॥ किमेकं दैवतं लोके किंवाप्येकं परायणम् ॥ स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभम् ॥ ३ ॥ को धर्मः सर्वधर्माणां भवतः परमो मतः ॥ किं जपन् मुच्यते जंतुर्जन्मसंसारबंधनात् ॥ ४ ॥ भीष्म उवाच ॥ जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमम् ॥ स्तुवन्नामसहस्रेण पुरुषः

सततोत्थितः ॥ ५ ॥ तमेव चार्चयन्नित्यं भक्त्या पुरुषम-
व्ययम् ॥ ध्यायन् स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥ ६ ॥
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ॥ लोकाध्यक्षं स्तुव-
न्नित्यं सर्वदुःखातिगो भवेत् ॥ ७ ॥ ब्रह्मण्यं सर्वधर्मज्ञं लो-
कानां कीर्तिवर्धनम् ॥ लोकनाथं महद्भूतं सर्वभूतभवोद्भवम्
॥ ८ ॥ एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ॥ यद्भक्त्या
पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ ९ ॥ परमं यो महत्तेजः
परमं यो महत्तपः ॥ परमं यो महद्ब्रह्म परमं यः पराय-
णम् ॥ १० ॥ पवित्राणां पवित्रं यो मंगलानां च मंगलम् ॥

दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥ ११ ॥ यतः सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये ॥ १२ ॥ तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ॥ विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १३ ॥ यानि नामानि गौणानि विख्यातानि महात्मनः ॥ ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ १४ ॥ अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमंत्रस्य भगवान् वेदव्यास ऋषिः ॥ श्रीविष्णुः परमात्मा देवता ॥ अनुष्टुप् छंदः ॥ अमृतांशूद्भवो भानुरिति बीजम् ॥ देवकीनंदनः स्रष्टेति शक्तिः ॥ त्रिसा-

मा सामगः सामेति हृदयम् ॥ शंखभृन्नंदकी चक्रीति कील-
कम् ॥ शार्ङ्गधन्वा गदाधर इत्यस्त्रम् ॥ रथांगपणिरक्षोभ्य इति
कवचम् ॥ उद्भवः क्षोभणो देव इति परमो मंत्रः ॥ श्रीमहा-
विष्णुप्रीत्यर्थे जपे विनियोगः ॥ अथ न्यासः ॥ विश्वं विष्णु-
र्वषट्कार इत्यंगुष्ठाभ्यां नमः ॥ अमृतांशूद्भवो भानुरिति त-
र्जनीभ्यां नमः ॥ ब्रह्मण्यो ब्रह्मकृत् ब्रह्मेति मध्यमाभ्यां नमः ॥
सुवर्णबिंदुरक्षोभ्य इत्यनामिकाभ्यां नमः ॥ निमिषोऽनि-
मिषः स्रग्वीति कनिष्ठिकाभ्यां नमः ॥ रथांगपाणिरक्षोभ्य
इति करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादिन्यासः ॥ अथ

ध्यानं || शांताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम् || लक्ष्मीकांतं कमलनयनं योगिभिर्ध्यानगम्यं वंदे विष्णुं भवभयहरं सर्वलोकैकनाथम् || १ ||
ॐ नमो भगवते वासुदेवाय || विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः || भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः || १ || पूतात्मा परमात्मा च मुक्तानां परमा गतिः || अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च || २ || योगो योगविदां नेता प्रधानपुरुषेश्वरः || नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः || ३ || सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिर-

व्ययः ॥ संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ४ ॥ स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ॥ अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ५ ॥ अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥ विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरोध्रुवः ॥ ६ ॥ अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ॥ प्रभूतस्त्रिककुब्धाम पवित्रं मंगलं परम् ॥ ७ ॥ ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ॥ हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८ ॥ ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ॥ अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९ ॥ सु-

रेशः शरणं शर्म विश्वरेताः प्रजाभवः ॥ अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥१०॥ अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ॥ वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ ११ ॥ वसुर्वसुमनाः सत्यः समात्मा संमितः समः ॥ अमोघः पुंडरीकाक्षो वृषकर्मा वृषाकृतिः ॥ १२ ॥ रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ॥ अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥ १३ ॥ सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ॥ वेदो वेदविदव्यंगो वेदांगो वेदवित्कविः ॥ १४ ॥ लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ॥ चतुरात्मा चतुर्व्यूह-

श्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५ ॥ भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ॥ अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १६ ॥ उपेंद्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ॥ अतींद्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥ १७ ॥ वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ॥ अतींद्रियो महामायो महोत्साहो महाबलः ॥ १८ ॥ महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ १९ ॥ महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ॥ अनिरुद्धः सुरानंदो गोविंदो गोविदां पतिः ॥ २० ॥ मरीचिर्दमनो हंसः

सुपर्णो भुजगोत्तमः ॥ हिरण्यानाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१ ॥ अमृत्युः सर्वदृक् सिंहः संधाता संधिमान् स्थिरः ॥ अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ २२ ॥ गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ॥ निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ २३ ॥ अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ॥ सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ २४ ॥ आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ॥ अहः संवर्तको वह्निरनिलो धरणीधरः ॥ २५ ॥ सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ॥ सत्कर्ता सत्कृतिः साधुर्ज-

हुर्नारायणो नरः ॥ २६ ॥ असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ॥ सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥ २७ ॥ वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ॥ वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ २८ ॥ सुभुजो दुर्धरो वाग्मी महेंद्रो वसुदो वसुः ॥ नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९ ॥ ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ॥ ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः ॥ ३० ॥ अमृतांशूद्भवो भानुः शशबिंदुः सुरेश्वरः ॥ औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ३१ ॥ भूतभव्यभवन्नाथः पवनः पा-

वनोऽनलः ॥ कामहा कामकृत् कांतः कामः कामप्रदः प्रभुः ॥ ३२ ॥ युगादिकृद्युगावर्तो नैकमायो महाशनः ॥ अदृश्योऽव्यक्तरूपश्च सहस्रजिदनंतजित् ॥ ३३ ॥ इष्टो विशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः ॥ क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ३४ ॥ अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ॥ अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५ ॥ स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः ॥ वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ॥ ३६ ॥ अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥ अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥३७॥

पद्मनाभोऽरविंदाक्षः पद्मगर्भः शरीरभृत् ॥ महर्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ३८ ॥ अतुलः शरभो भीमः समयज्ञो हविर्हरिः ॥ सर्वलक्षणलक्षण्यो लक्ष्मीवान् संमितिंजयः ॥ ३९ ॥ विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ॥ महीधरो महाभागो वेगवानमिताशनः ॥ ४० ॥ उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ॥ करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ४१ ॥ व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ॥ परार्धिः परमः स्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ४२ ॥ रामो विरामो विरजो मार्गो नेयो नयोऽनयः ॥ वीरः शक्तिमतां श्रेष्ठो

धर्मो धर्मविदुत्तमः ॥ ४३ ॥ वैकुंठः पुरुषः प्राणः प्राणदः
प्रणवः पृथुः ॥ हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः
॥ ४४ ॥ ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥ उग्रः संव-
त्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ४५ ॥ विस्तारः स्थावरः
स्थाणुः प्रमाणं वीजमव्ययम् ॥ अर्थोऽनर्थो महाकोशो महा-
भोगो महाधनः ॥ ४६ ॥ अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो
महामखः ॥ नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ४७ ॥
यज्ञ इज्यो महेज्यश्च ऋतुः सत्रं सतां गतिः ॥ सर्वदर्शी विमु-
क्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ४८ ॥ सुव्रतः सुमुखः सूक्ष्मः

सुघोषः सुखदः सुहृत् ॥ मनोहरो जितक्रोधो वीरबाहुर्विदा-
रणः ॥ ४९ ॥ स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ॥
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ५० ॥ धर्मगुब्ध-
र्मकृद्धर्मी सदसत्क्षरमक्षरम् ॥ अविज्ञाता सहस्रांशुर्विधाता
कृतलक्षणः ॥ ५१ ॥ गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहे-
श्वरः ॥ आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ५२ ॥
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥ शरीरभूतभृद्भोक्ता-
कपींद्रो भूरिदक्षिणः ॥ ५३ ॥ सोमपोऽमृतपः सोमः पुरुजि-
त्पुरुसत्तमः ॥ विनयो जयः सत्यसंधो दाशार्हः सात्वतां पतिः

॥ ५४ ॥ जीवो विनयिता साक्षी मुकुंदोऽमितविक्रमः ॥ अंभो-
निधिरनंतात्मा महोदधिशयोऽतकः ॥ ५५ ॥ अजो महार्हः
स्वाभाव्यो जितामित्रः प्रमोदनः ॥ आनंदो नंदनो नंदः सत्य-
धर्मा त्रिविक्रमः ॥ ५६ ॥ महर्षिः कपिलाचार्यः कृतज्ञो मेदि-
नीपतिः ॥ त्रिपदस्त्रिदशाध्यक्षो महाश्रृंगः कृतांतकृत् ॥ ५७ ॥
महावराहो गोविंदः सुषेणः कनकांगदी ॥ गुह्यो गभीरो
गहनो गुप्तश्चक्रगदाधरः ॥ ५८ ॥ वेधाः स्वांगोऽजितः कृष्णो
दृढः संकर्षणोऽच्युतः ॥ वरुणो वारुणो वृक्षः पुष्कराक्षो महा-
मनाः ॥ ५९ ॥ भगवान् भगहा नंदी वनमाली हलायुधः ॥

आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ६० ॥ सुधन्वा खंडपरशुर्दारुणो द्रविणप्रदः ॥ दिवस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ६१ ॥ त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ॥ संन्यासकृच्छमः शांतो निष्ठा शांतिः परायणः ॥ ६२ ॥ शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेशयः ॥ गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३ ॥ अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ॥ श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥ ६४ ॥ श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ॥ श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लो-

क्त्रयाश्रयः ॥ ६५ ॥ स्वक्षः स्वंगः शतानंदो नंदिर्ज्योतिर्गणे-
श्वरः ॥ विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ६६ ॥
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः ॥ भूशयो भूषणो
भूतिर्विशोकः शोकनाशनः ॥ ६७ ॥ अर्चिष्मानार्चितः कुंभो
विशुद्धात्मा विशोधनः ॥ अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमित-
विक्रमः ॥ ६८ ॥ कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ॥
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ६९ ॥
कामदेवः कामपालः कामी कांतः कृतागमः ॥ अनिर्देश्यवपु-
र्विष्णुर्वीरोऽनंतो धनंजयः ॥ ७० ॥ ब्रह्मण्यो ब्रह्मकृत् ब्रह्मा

ब्रह्म ब्रह्मविवर्धनः ॥ ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मण-प्रियः ॥ ७१ ॥ महाक्रमो महाकर्मा महातेजा महोरगः ॥ महा-क्रतुर्महायज्वा महायज्ञो महाहविः ॥ ७२ ॥ स्तव्यः स्तव-प्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ॥ पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७३ ॥ मनोजवस्तीर्थकरो वसुरेता वसु-प्रदः ॥ वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ७४ ॥ सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ॥ शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥७५॥ भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ॥ दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥७६॥ विश्वमू-

र्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ॥ अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ७७ ॥ एकोऽनैकः सवः कः किं यत्तत्पदमनुत्तमम् ॥ लोकबंधुर्लोकनाथो माधवो भक्तवत्सलः ॥ ७८ ॥ सुवर्णवर्णो हेमांगो वरांगश्चंदनांगदी ॥ वीरहा विषमः शून्यो धृताशीरचलश्चलः ॥ ७९ ॥ अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ॥ सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ८० ॥ तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ॥ प्रग्रहो निग्रहोऽव्यग्रो नैकश्रृंगो गदाग्रजः ॥ ८१ ॥ चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥ चतुरात्मा चतुर्भावश्चतुर्वेदविदेक-

पात् ॥ ८२ ॥ समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ॥
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥८३॥ शुभांगो लोक-
सारंगः सुतंतुस्तंतुवर्धनः ॥ इंद्रकर्मा महाकर्मा कृतकर्मा कृता-
गमः ॥ ८४ ॥ उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः ॥ अर्को
वाजसनः शृंगी जयंतः सर्वविज्जयी ॥ ८५ ॥ सुवर्णबिंदुरक्षोभ्यः
सर्ववागीश्वरेश्वरः ॥ महाह्रदो महागर्तो महाभूतो महानि-
धिः ॥ ८६ ॥ कुमुदः कुंदरः कुंदः पर्जन्यः पावनोऽनिलः ॥
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ ८७ ॥ सुलभः
सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ॥ न्यग्रोधोदुंबरोऽश्वत्थश्चा-

णूरांध्रनिषूदनः ॥ ८८ ॥ सहस्रार्चिः सप्तजिह्वः सप्तैधाः
सप्तवाहनः ॥ अमूर्तिरनघोऽचिंत्यो भयकृद्भयनाशनः ॥८९॥
अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ॥ अधृतः स्वधृतः
स्वास्यः प्राग्वंशो वंशवर्धनः ॥ ९० ॥ भारभृत् कथितो
योगी योगीशः सर्वकामदः ॥ आश्रमः श्रमणः क्षामः सुपर्णो
वायुवाहनः ॥ ९१ ॥ धनुर्धरो धनुर्वेदो दंडो दमयिता दमः ॥
अपराजितः सर्वसहो नियंता नियमो यमः ॥ ९२ ॥ सत्त्ववान्
सात्त्विकः सत्यः सत्यधर्मपरायणः ॥ अभिप्रायः प्रियार्होऽर्हः
प्रियकृत् प्रीतिवर्धनः ॥ ९३ ॥ विहायसगतिर्ज्योतिः सुरु-

चिर्हुतभुग्विभुः ॥ रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ ९४ ॥ अनंतो हुतभुग्भोक्ता सुखदो नैकदोऽग्रजः ॥ अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५ ॥ सनात्सनाततनतमः कपिलः कपिरव्ययः ॥ स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ॥ ९६ ॥ अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः ॥ शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥ ९७ ॥ अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ॥ विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ ९८ ॥ उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ॥ वीरहा रक्षणः संतो जीवनः

पर्यवस्थितः ॥ ९९ ॥ अनंतरूपोऽनंतश्रीर्जितमन्युर्भयापहः ॥
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥१००॥ अना-
दिर्भूर्भुवोलक्ष्मीः सुवीरो रुचिरांगदः ॥ जननो जनजन्मा-
दिर्भीमोभीमपराक्रमः ॥ १ ॥ आधारनिलयो धाता पुष्प-
हासः प्रजागरः ॥ ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः
॥ २ ॥ प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः ॥ तत्त्वं
तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥३॥ भूर्भुवःस्वस्तरुस्तारः
सपिता प्रपितामहः ॥ यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवा-
हनः ॥ ४ ॥ यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ॥ यज्ञांत-

कृद्यज्ञगुह्यमन्नमन्नाद एव च || ५ || आत्मयोनिः स्वयंजातो वैखानः सामगायनः || देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः || ६ || शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः || रथांगपाणिरक्षोभ्यः सर्वप्रहरणायुधः || ७ || सर्वप्रहरणायुध ओंनम इति || इतीदं कीर्तनीयस्य केशवस्य महात्मनः || नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् || १ || य यदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् || नाशुभं प्राप्नुयात्किंचित्सोऽमुत्रेह च मानवः || २ || वेदांतगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् || वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् || ३ ||

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ॥ कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाम् ॥ ४ ॥ भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ॥ सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥ ५ ॥ यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ॥ अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥ ६ ॥ न भयं क्वचिदाप्नोति वीर्यं तेजश्च विंदति ॥ भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥ ७ ॥ रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनात् ॥ भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ ८ ॥ दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ॥ स्तुवन्नामसहस्रेण नित्यं

भक्तिसमन्वितः ॥९॥ वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ॥ सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ १० ॥ न वासुदेवभक्तानामशुभं विद्यते क्वचित् ॥ जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ ११ ॥ इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ॥ युज्येतात्मा सुखक्षांतिश्रीधृतिस्मृतिकीर्तिभिः॥ १२ ॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ॥ भवंति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ १३ ॥ द्यौः सचंद्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ॥ वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ १४ ॥ ससुरासुरगंधर्वं सयक्षोरगराक्षसम् ॥ जग-

द्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ १५ ॥ इंद्रियाणि मनो
बुद्धिः सत्त्वं तेजो बलं धृतिः ॥ वासुदेवात्मकान्याहुः क्षेत्रं
क्षेत्रज्ञ एव च ॥ १६ ॥ सर्वागमानामाचारः प्रथमं परिक-
ल्पते ॥ आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ १७ ॥ ऋष-
यः पितरो देवा महाभूतानि धातवः ॥ जंगमाजंगमं चेदं
जगन्नारायणोद्भवम् ॥ १८ ॥ योगो ज्ञानं तथा सांख्यं विद्याः
शिल्पादि कर्म च ॥ वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्द-
नात् ॥ १९ ॥ एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ॥ त्रीन्
लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥ २० ॥ इमं

स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ॥ पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ २१ ॥ विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ॥ भजंति ये पुष्कराक्षं न ते यांति पराभवम् ॥ २२ ॥ अर्जुन उवाच ॥ पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम ॥ भक्तानामनुरक्तानां त्राता भव जनार्दन ॥ २३ ॥ श्रीभगवानुवाच ॥ यो मां नामसहस्रेण स्तोतुमिच्छति पांडव ॥ सोऽहमेकेन श्लोकेन स्तुत एव न संशयः ॥ २४ ॥ नमोऽस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ २५ ॥ नमः

कमलनाभाय नमस्ते जलशायिने ॥ नमस्ते केशवानंत वासु-
देव नमोऽस्तु ते ॥ २६ ॥ वासनाद्वासुदेवस्य वासितं भुवनत्र-
यम् ॥ सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥ २७ ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥ जगद्धिताय कृष्णा-
य गोविंदाय नमो नमः ॥ २८ ॥ आकाशात्पतितं तोयं यथा
गच्छति सागरम् ॥ सर्वदेवनमस्कारः केशवं प्रति गच्छति
॥ २९ ॥ एष निष्कंटकः पंथा यत्र संपूज्यते हरिः ॥ कुपथं
तं विजानीयाद्गोविंदरहितागमम् ॥ ३० ॥ सर्ववेदेषु यत्पुण्यं
सर्वतीर्थेषु यत्फलम् ॥ तत्फलं समवाप्नोति स्तुत्वा देवं जनार्द-

नम् ॥ ३१ ॥ यो नरः पठते नित्यं त्रिकालं केशवालये ॥ द्विकालमेककालं वा क्रूरं सर्वं व्यपोहति ॥३२॥ दह्यंते रिपवस्तस्य सौम्याः सर्वे सदा ग्रहाः ॥ विलीयंते च पापानि स्तवे ह्यस्मिन् प्रकीर्तिते ॥ ३३ ॥ येन ध्यातः श्रुतो येन येनायं पठ्यते स्तवः ॥ दत्तानि सर्वदानानि सुराः सर्वे समर्चिताः ॥ ३४ ॥ इह लोके परे वापि न भयं विद्यते क्वचित् ॥ नाम्नां सहस्रं योऽधीते द्वादश्यां मम संनिधौ ॥ ३५ ॥ शनैर्दहति पापानि कल्पकोटिशतानि च ॥ अश्वत्थसंनिधौ पार्थ तुलसीसंनिधौ तथा ॥ ३६ ॥ पठेन्नामसहस्रं तु गवां कोटिफलं लभेत् ॥ शिवा-

लये पठेन्नित्यं तुलसीवनसंस्थितः ॥ ३७ ॥ नरो मुक्तिमवाप्नोति चक्रपाणेर्वचो यथा ॥ ब्रह्महत्यादिकं घोरं सर्वपापं विनश्यति ॥ ३८ ॥ इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यामानुशासनिके पर्वणि दानधर्मे भीष्मयुधिष्ठिरसंवादे श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं संपूर्णम् ॥ श्रीकृष्णार्पणमस्तु ॥

॥ इति विष्णुसहस्रनाम समाप्तम् ॥

॥ अथ भीष्मस्तवराजप्रारंभः ॥

श्रीगणेशाय नमः ॥ श्रीगोपालकृष्णाय नमः ॥ जनमेजय
उवाच ॥ शरतल्पे शयानस्तु भारतानां पितामहः ॥ कथमुत्सृ-
ष्टवान्देहं कं च योगमधारयत् ॥ १ ॥ वैशंपायन उवाच ॥
शृणुष्वावहितो राजन् शुचिर्भूत्वा समाहितः ॥ भीष्मस्य कुरु-
शार्दूल देहोत्सर्गं महात्मनः ॥ २ ॥ निवृत्तमात्रे त्वयन उत्तरे वै
दिवाकरे ॥ समावेशयदात्मानमात्मन्येव समाहितः ॥ ३ ॥
शुक्लपक्षस्य चाष्टम्यां माघमासस्य पार्थिव ॥ प्राजापत्ये च नक्षत्रे
मध्यं प्राप्ते दिवाकरे ॥ ४ ॥ विकीर्णांशुरिवादित्यो भीष्मः
शरशतैश्चितः ॥ शुशुभे परया लक्ष्म्या वृतो ब्राह्मणसत्तमैः

॥ ५ ॥ व्यासेन वेदविदुषा नारदेन सुरर्षिणा ॥ देवरातेन वात्स्येन तथा तेन सुमंतुना ॥ ६ ॥ तथा जैमिनिना चैव पैलेन च महात्मना ॥ शांडिल्यदेवलाभ्यां च मैत्रेयेण च धीमता ॥ ७ ॥ असितेन वसिष्ठेन कौशिकेन महात्मना ॥ हारीतरोमशाभ्यां च तथात्रेयेण धीमता ॥ ८ ॥ बृहस्पतिश्च शुक्रश्च च्यवनश्च महामुनिः ॥ सनत्कुमारकपिलौ वाल्मीकिस्तुंबुरुः कुरुः ॥ ९ ॥ मौद्गल्यो भार्गवो रामस्तृणबिंदुर्महामुनिः ॥ पिप्पलादश्च वायुश्च संवर्तः पुलहः कचः ॥ १० ॥ कश्यपश्च पुलस्त्यश्च क्रतुर्दक्षः पराशरः ॥ मरीचिरंगिराः कण्वो गौत-

मो गालवो मुनिः ॥ ११ ॥ धौम्यो विभांडो मांडव्यो धौम्रः कृष्णोऽनुभौतिकः ॥ उलूकः परमो विप्रो मार्कंडेयो महामुनिः ॥ १२ ॥ भास्करः पूरणः कृष्णः सूतः परमधार्मिकः ॥ शैव्येन याज्ञवल्क्येन शंखेन लिखितेन च ॥ १३ ॥ एतैश्चान्यैर्मुनिगणैर्महाभागैर्महात्मभिः ॥ श्रद्धादमपुरस्कारैर्वृतश्चंद्र इव ग्रहैः ॥ १४ ॥ भीष्मस्तु पुरुषव्याघ्र कर्मणा मनसा गिरा ॥ शरतल्पगतः कृष्णं प्रदध्यौ प्रांजलिः शुचिः ॥ १५ ॥ स्वरेण हृष्टपुष्टेन तुष्टाव मधुसूदनम् ॥ योगेश्वरं पद्मनाभं विष्णुं जिष्णुं जगत्प्रभुम् ॥ १६ ॥ कृतांजलिः शुचि-

भूत्वा वाग्विदां प्रवरः प्रभुः ॥ भीष्मः परमधर्मात्मा वासुदेवमथास्तुवत् ॥ १७ ॥ भीष्म उवाच ॥ आरिराधयिषुः कृष्णं वाचं जिगदिषाम्यहम् ॥ तया व्याससमासिन्या प्रीयतां पुरुषोत्तमः ॥ १८ ॥ शुचिं शुचिपदं हंसं तत्पदं परमेष्ठिनम् ॥ मुक्त्वा सर्वात्मनात्मानं तं प्रपद्ये प्रजापतिम् ॥ १९ ॥ अनाद्यं तत्परं ब्रह्म न देवा नर्षयो विदुः ॥ एकोऽयं भगवान्देवो धाता नारायणो हरिः ॥ २० ॥ नारायणादृषिगणास्तथा सिद्धमहोरगाः ॥ देवा देवर्षयश्चैव तं विदुः परमव्ययम् ॥ २१ ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ यं न

जानंति को ह्येष कुतो वा भगवानिति ॥ २२ ॥ यस्मि-न्विश्वानि भूतानि तिष्ठंति च विशंति च ॥ गुणभूतानि भूतेशे सूत्रे मणिगणा इव ॥ २३ ॥ यस्मिन्नित्ये तते तंतौ दृढे स्रगिव तिष्ठति ॥ सदसद्ग्रथितं विश्वं विश्वांगे विश्वकर्मणि ॥ २४ ॥ हरिं सहस्रशिरसं सहस्रचरणेक्षणम् ॥ सहस्रबा-हुमुकुटं सहस्रवदनोज्ज्वलम् ॥ प्राहुर्नारायणं देवं यं विश्वस्य परायणम् ॥ २५ ॥ अणीयसामणीयांसं स्थविष्ठं च स्थवी-यसाम् ॥ गरीयसां गरीष्ठं च श्रेष्ठं च श्रेयसामपि ॥ २६ ॥ यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ॥ गृणंति सर्वकर्माणं

सत्यं सत्येषु सामसु ॥ २७ ॥ चतुर्भिश्चतुरात्मानं सत्त्वस्थं सात्वतां पतिम् ॥ यं दिव्यैर्देवमर्चंति गुह्यैः परमनामभिः ॥ २८ ॥ यस्मिन्नित्यं तपस्तप्तं यदंगेष्वनुतिष्ठति ॥ सर्वात्मा सर्ववित्सर्वः सर्वगः सर्वभावनः ॥ २९ ॥ यं देवं देवकी देवी वसुदेवादजीजनत् ॥ भूमेश्च ब्रह्मणो गुप्त्यै दीप्तमग्निमिवारणिः ॥३०॥ यमनन्यो व्यपेताशीरात्मानं वीतकल्मषम् ॥ इष्ट्वाऽऽनंत्याय गोविंदं पश्यत्यात्मानमात्मनि ॥ ३१ ॥ अतिवाय्विंद्रकर्माणमतिसूर्याग्नितेजसम् ॥ अतिबुद्धींद्रियात्मानं तं प्रपद्ये प्रजापतिम् ॥ ३२ ॥ पुराणे पुरुषं प्रोक्तं ब्रह्म प्रोक्तं युगादिषु-

क्षये संकर्षणं प्रोक्तं तमुपास्यमुपास्महे ॥ ३३॥ यमेकं बहुधात्मानं प्रादुर्भूतमधोक्षजम् ॥ नान्यं भक्ताः क्रियावंतो यजंते सर्व-कामदम् ॥ ३४ ॥ यं प्राहुर्जगतः कोशं यस्मिन्संनिहिताः प्रजाः ॥ यस्मिँल्लोकाः स्फुरंतीमे जले शकुनयो यथा ॥ ३५ ॥ ऋतमेकाक्षरं ब्रह्म यत्तत्सदसतः परम् ॥ अनादिमध्यपर्यंतं न देवा नर्षयो विदुः ॥ ३६ ॥ यं सुरासुरगंधर्वाः ससिद्धर्षि-महोरगाः ॥ प्रयता नित्यमर्चंति परमं दुःखभेषजम् ॥ ३७ ॥ अनादिनिधनं देवमात्मयोनिं सनातनम् ॥ अवितर्क्यमविज्ञेयं हरिं नारायणं प्रभुम् ॥ ३८ ॥ यं वै विश्वस्य कर्तारं जगत-

स्तस्थुषां पतिम् ॥ वदंति जगतोऽध्यक्षमक्षरं परमं पदम् ॥३९॥ हिरण्यवर्णो यो गर्भो दितेर्दैत्यनिषूदनः ॥ एको द्वादशधा जज्ञे तस्मै सूर्यात्मने नमः ॥ ४० ॥ शुक्ले देवान् पितॄन् कृष्णे तर्पयत्यमृतेन यः ॥ यश्च राजा द्विजातीनां तस्मै सोमात्मने नमः ॥ ४१ ॥ हुताशनमुखैर्देवैर्धार्यते सकलं जगत् ॥ हविःप्रथमभोक्ता यस्तस्मै होत्रात्मने नमः ॥ ४२ ॥ महतस्तमसः पारे पुरुषं ह्यतितेजसम् ॥ यं ज्ञात्वा मृत्युमत्येति तस्मै ज्ञेयात्मने नमः ॥४३॥ यं बृहंतं बृहत्युक्थं यमग्नौ यं महाध्वरे ॥ यं विप्रसंघा गायंति तस्मै वेदात्मने नमः ॥ ४४ ॥ ऋग्यजुःसामाथर्वाणं दशार्धं हविरात्मकम् ॥ यं सप्ततंतुं तन्वंति तस्मै यज्ञात्मने

नमः ॥४५॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च ॥ हूयते च पुनर्द्वाभ्यां तस्मै होमात्मने नमः ॥ ४६ ॥ यः सुपर्णो यजुर्नाम छंदोगात्रस्त्रिवृच्छिराः ॥ रथंतरं बृहत्साम तस्मै स्तोत्रात्मने नमः ॥ ४७ ॥ यः सहस्रसमे सत्रे यज्ञे विश्वसृजामृषिः ॥ हिरण्यपक्षः शकुनिस्तस्मै तार्क्ष्यात्मने नमः ॥ ४८ ॥ पदांगसंधिपर्वाणं स्वरव्यंजनभूषणम् ॥ यमाहुश्चाक्षरं नित्यं तस्मै वागात्मने नमः ॥४९॥ यज्ञांगो यो वराहो वै भूत्वा गामुज्जहार ह ॥ लोकत्रयहितार्थाय तस्मै वीर्यात्मने नमः ॥५०॥ यः शेते योगमास्थाय पर्यंके नागभूषिते ॥ फणासहस्ररचिते तस्मै निद्रात्मने

नमः ॥ ५१ ॥ यश्चिनोति सतां सेतुमृतेनामृतयोनिना ॥ धर्मार्थं व्यवहारार्थं तस्मै सत्यात्मने नमः ॥ ५२ ॥ यं पुनर्धर्मचरणाः पृथग्धर्मफलैषिणः ॥ पृथग्धर्मैः समर्चंति तस्मै धर्मात्मने नमः ॥ ५३ ॥ यतः सर्वे प्रसूयंते ह्यनंगाच्चैव देहिनः ॥ उन्मादः सर्वभूतानां तस्मै कामात्मने नमः ॥ ५४ ॥ यत्तद्व्यक्तस्थमव्यक्तं विचिन्वंति महर्षयः ॥ क्षेत्रे क्षेत्रज्ञमासीनं तस्मै क्षेत्रात्मने नमः ॥ ५५ ॥ यं त्रिधात्मानमात्मस्थं वृतं षोडशभिर्गुणैः ॥ प्राहुः सप्तदशं सांख्यास्तस्मै सांख्यात्मने नमः ॥ ५६ ॥ यं विनिद्रा जितश्वासाः शांता दांता जितेंद्रियाः ॥

ज्योतिः पश्यंति युंजानास्तस्मै योगात्मने नमः ॥ ५७ ॥ अपुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः ॥ शांताः संन्यासिनो यांति तस्मै मोक्षात्मने नमः ॥ ५८ ॥ योऽसौ युगसहस्रांते प्रदीप्तार्चिर्विभावसुः ॥ संक्षोभयति भूतानि तस्मै घोरात्मने नमः ॥५९॥ संभक्ष्य सर्वभूतानि कृत्वा चैकार्णवं जगत् ॥ बालः स्वपिति यश्चैकस्तस्मै मायात्मने नमः ॥ ६० ॥ अजस्य नाभ्यां संभूतं यस्मिन्विश्वं प्रतिष्ठितम् ॥ पुष्करं पुष्कराक्षस्य तस्मै पद्मात्मने नमः ॥ ६१ ॥ सहस्रशिरसे चैव पुरुषायामितात्मने ॥ चतुःसमुद्रपर्यंके योगनिद्रात्मने नमः ॥ ६२ ॥ यस्य केशे-

षु जीमूता नद्यः सर्वांगसंधिषु ॥ कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥ ६३ ॥ यस्मात्सर्वाः प्रसूयंते सर्गप्रलयविक्रियाः ॥ यस्मिंश्चैव प्रलीयंते तस्मै हेत्वात्मने नमः ॥ ६४ ॥ यो निषण्णो भवेद्रात्रौ दिवा भवति धिष्ठितः ॥ इष्टानिष्टस्य च द्रष्टा तस्मै द्रष्ट्रात्मने नमः ॥ ६५ ॥ अकुंठं सर्वकार्येषु धर्मकार्यार्थमुद्यतम् ॥ वैकुंठस्य हि तद्रूपं तस्मै कार्यात्मने नमः॥६६॥ विभज्य पंचधात्मानं वायुभूतः शरीरगः ॥ यश्चेष्टयति भूतानि तस्मै वाय्वात्मने नमः ॥ ६७ ॥ ब्रह्म वक्त्रं भुजौ क्षत्रं कृत्स्नमूरूदरं विशः ॥ पादौ यस्याश्रिताः शूद्रास्तस्मै वर्णात्मने

नमः || ६८ || युगेष्वावर्तमानेषु मासर्त्वयनहायनैः || सर्गप्रलययोः कर्ता तस्मै कालात्मने नमः || ६९ || यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः || सूर्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नमः || ७० || परः कालात्परो यज्ञात्परात्परतरो हि यः || अनादिरादिर्विश्वस्य तस्मै विश्वात्मने नमः || ७१ || विषये वर्तमानो यस्तं वैशेषिकनिर्गुणैः || प्राहुर्विषयगोप्तारं तस्मै गोप्त्रात्मने नमः || ७२ || अन्नपानेंधनमयो रसप्राणविवर्धनः || यो धारयति भूतानि तस्मै प्राणात्मने नमः || ७३ || पिंगेक्षणसटं यस्य रूपं दंष्ट्रानखायुधम् || दानवेंद्रांतकरणं तस्मै

दृसात्मने नमः ॥ ७४ ॥ रसातलगतः श्रीमाननंतो भगवान्विभुः ॥ जगद्धारयते कृत्स्नं तस्मै वीर्यात्मने नमः ॥७५॥ यो मोहयति भूतानि स्नेहपाशानुबंधनैः ॥ सर्गस्य रक्षणार्थाय तस्मै मोहात्मने नमः ॥७६॥ भूतलातलमध्यस्थो हत्वा तु मधुकैटभौ ॥ उद्धृता येन वै वेदास्तस्मै मत्स्यात्मने नमः ॥ ७७ ॥ ससागरवनां बिभ्रत्सप्तद्वीपां वसुंधराम् ॥ यो धारयति पृष्ठेन तस्मै कूर्मात्मने नमः ॥ ७८ ॥ एकार्णवे हि मग्नां गां वाराहं रूपमास्थितः ॥ उद्दधार महीं योऽसौ तस्मै क्रोडात्मने नमः ॥ ७९ ॥ नारसिंहं वपुः कृत्वा यस्त्रैलोक्यभयंकरम् ॥ हिर-

ण्यकशिपुं जघ्ने तस्मै सिंहात्मने नमः ॥ ८० ॥ वामनं रूप-
मास्थाय बलिं संयम्य मायया ॥ इमे क्रांतास्त्रयो लोकास्तस्मै
क्रांतात्मने नमः ॥ ८१ ॥ जमदग्निसुतो भूत्वा रामः परशुधृग्
विभुः ॥ सहस्रार्जुनहंतैव तस्मा उग्रात्मने नमः ॥८२॥ रामो दा-
शरथिर्भूत्वा पौलस्त्यकुलनंदनम् ॥ जघान रावणं संख्ये तस्मै
क्षत्रात्मने नमः ॥ ८३ ॥ वसुदेवसुतः श्रीमान्वासुदेवो जग-
त्पतिः ॥ जहार वसुधाभारं तस्मै कृष्णात्मने नमः ॥ ८४ ॥
बुद्धरूपं समास्थाय सर्वरूपपरायणः ॥ मोहयन्सर्वभूतानि
तस्मै बुद्धात्मने नमः ॥ ८५ ॥ हनिष्यति कलेरंते म्लेच्छांस्तु-

रगवाहनः ॥ धर्मसंस्थापनार्थाय तस्मै कल्क्यात्मने नमः ॥८६॥ आत्मज्ञानमिदं ज्ञानं ज्ञात्वा पंचस्ववस्थितः ॥ यं ज्ञानेनाधिगच्छंति तस्मै ज्ञानात्मने नमः ॥ ८७ ॥ अप्रमेयशरीराय सर्वतो बुद्धिचक्षुषे ॥ अपारपरिमेयाय तस्मै दिव्यात्मने नमः ॥ ८८ ॥ जटिने दंडिने नित्यं लंबोदरशरीरिणे ॥ कमंडलुनिषंगाय तस्मै ब्रह्मात्मने नमः ॥ ८९ ॥ शूलिने त्रिदशेशाय त्र्यंबकाय महात्मने ॥ भस्मदिग्धोर्ध्वलिंगाय तस्मै रुद्रात्मने नमः ॥ ९० ॥ चंद्रार्धकृतशीर्षाय व्यालयज्ञोपवीतिने ॥ पिनाकशूलहस्ताय तस्मा उग्रात्मने नमः ॥ ९१ ॥ पंचभूतात्मभूता-

य भूतादिनिधनाय च ॥ अक्रोधद्रोहमोहाय तस्मै शांतात्मने नमः ॥ ९२ ॥ यस्मिन्सर्वे यतः सर्वे यः सर्वे सर्वतश्च यः ॥ यश्च सर्वमयो देवस्तस्मै सर्वात्मने नमः ॥ ९३ ॥ विश्वकर्मन्नमस्तेऽस्तु विश्वात्मा विश्वसंभवः ॥ अपवर्गस्थभूतानां पंचानां परतः स्थितः ॥ ९४ ॥ नमस्ते त्रिषु लोकेषु नमस्ते परतस्त्रिषु ॥ नमस्ते त्रिषु सर्वेषु त्वं हि सर्वमयो निधिः ॥ ९५ ॥ नमस्ते भगवन्विष्णो लोकानां प्रभवाप्यय ॥ त्वं हि कर्ता हृषीकेश संहर्ता चापराजितः ॥ ९६ ॥ तेन पश्यामि भगवन् दिव्येषु त्रिषु वर्त्मसु ॥ तच्च पश्यामि तत्त्वेन यत्ते रूपं सनातनम् ॥ ९७ ॥

द्यौश्च ते शिरसा व्याप्ता पद्भ्यां देवी वसुंधरा ॥ विक्रमेण त्रयो लोकाः पुरुषोऽसि सनातनः ॥ ९८ ॥ दिशो भुजा रविश्चक्षुर्वीर्यं शुक्रः प्रजापतिः ॥ सप्त मार्गा निरुद्धास्ते वायोरमिततेजसः ॥९९॥ अतसीपुष्पसंकाशं पीतकौशेयवाससम् ॥ ये नमस्यंति गोविंदं न तेषां विद्यते भयम् ॥ १०० ॥ नमो नरकसंत्रासरक्षामंडलकारिणे ॥ संसारनिम्नगावर्ततरिकाष्ठाय विष्णवे ॥१०१॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥ जगद्धिताय कृष्णाय गोविंदाय नमो नमः ॥ २ ॥ प्राणकांतारपाथेयं संसारच्छेदभेषजम् ॥ दुःखशोकपरित्राणं हरिरित्यक्षरद्वयम् ॥ ३ ॥ यथा

विष्णुमयं सत्यं यथा विष्णुमयं जगत् ॥ यथा विष्णुमयं सर्वं पापं नाशयते तथा ॥ ४ ॥ त्वां प्रपन्नाय भक्ताय गतिमिष्टां जिगीषवे ॥ यच्छ्रेयः पुंडरीकाक्ष तद्ध्यायस्व सुरेश्वर ॥ ५ ॥ इति विद्यातपोयोनिरयोनिर्विष्णुरीडितः ॥ वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः ॥ ६ ॥ नारायणपरं ब्रह्म नारायणपरं तपः ॥ नारायणपरं चेदं सर्वं नारायणात्मकम् ॥ ७ ॥ वैशंपायन उवाच ॥ ॥ एतावदुक्त्वा वचनं भीष्मस्त्वाहृतमानसः ॥ नम इत्येव कृष्णाय प्रणाममकरोत्तदा ॥ ८ ॥ अभिगम्य तु योगेन भक्तिं भीष्मस्य माधवः ॥ त्रैलोक्यदर्शनज्ञानं

दिव्यं दत्त्वा ययौ हरिः ॥ ९ ॥ तस्मिन्नुपरते शब्दे ततस्ते ब्रह्म-वादिनः ॥ भीष्मं वाग्भिर्बाष्पकंठास्तमानर्चुर्महामतिम् ॥ ११० ॥ ते स्तुवंतश्च विप्राग्र्याः केशवं पुरुषोत्तमम् ॥ भीष्मं च शनकैः सर्वे प्रशशंसुः पुनः पुनः ॥ ११ ॥ यं योगिनः प्राणवियोग-काले यत्नेन चित्ते विनिवेशयंति ॥ साक्षात्पुरस्ताद्धरिमीक्ष-माणः प्राणाञ्जहौ प्राप्तकालो हि भीष्मः ॥ १२ ॥ शुक्ल-पक्षे दिवा भूमौ गंगायां चोत्तरायणे ॥ धन्यास्तात मरिष्यंति हृदयस्थे जनार्दने ॥ १३ ॥ विदित्वा भक्तियोगं तु भीष्मस्य पुरुषोत्तमः ॥ सहसोत्थाय संतुष्टो यानमेवाभ्यपद्यत ॥ १४ ॥

केशवः सात्यकिश्चैव रथेनैकेन जग्मतुः ॥ अपरेण महात्मानौ युधिष्ठिरधनंजयौ ॥ १५ ॥ भीमसेनो यमौ चोभौ रथमेकं समास्थिताः ॥ कृपो युयुत्सुः सूतश्च संजयश्चापरं रथम् ॥१६॥ ते रथैर्नगराकारैः प्रयाताः पुरुषर्षभाः ॥ नेमिघोषेण महता कंपयंतो वसुंधराम् ॥ १७ ॥ ततो गिरः पुरुषवरस्तवान्विता द्विजेरिताः पथि सुमनाः स शुश्रुवे ॥ कृतांजलिं प्रणतमथापरं जनं स केशिहा मुदितमनाऽभ्यनंदत ॥ १८ ॥ अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ॥ धर्माध्यक्षं स्तुवन्नित्यं सर्वपापैः प्रमुच्यते ॥ १९ ॥ इमं स्तवं यः पठति शार्ङ्गधन्वनः

शृणोति वा भक्तिसमन्वितो जनः ॥ स चक्रधृक् प्रतिहतसर्वकल्मषो जनार्दनं प्रविशति देहसंक्षये ॥ १२० ॥ अशनिशितसुधारं यस्य चक्रं सुचारु मणिकनकविचित्रे कुंडले यस्य कर्णे ॥ भ्रमरशतसहस्रैः सेविता यस्य माला असुरकुलनिहंता प्रीयतां वासुदेवः ॥ २१ ॥ स्तवराजः समाप्तोयं विष्णोरद्भुतकर्मणः ॥ गांगेयेन पुरा गीतो महापातकनाशनः ॥ २२ ॥ श्रीभगवानुवाच ॥ यः संपठेदिदं स्तोत्रं मम जन्मानुकीर्तनम् ॥ देवलोकमतिक्रम्य तस्य लोको यथा मम ॥१२३॥ इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शांतिपर्वणि भीष्मयुधिष्ठिरसंवादे भीष्मस्तवराजः समाप्तः ॥

॥ अथानुस्मृतिः प्रारभ्यते ॥

श्रीगणेशाय नमः ॥ श्रीगोपालकृष्णाय नमः ॥ शतानीक उवाच ॥ महामते महाप्राज्ञ सर्वशास्त्रविशारद ॥ अक्षीणकर्मबंधस्तु पुरुषो द्विजसत्तम ॥ १ ॥ सततं किं जपेज्जाप्यं विबुधः किमनुस्मरन् ॥ मरणे यज्जपेज्जाप्यं यं च भावमनुस्मरन् ॥ २ ॥ यं च ध्यात्वा द्विजश्रेष्ठ पुरुषो मृत्युमागतः ॥ परं पदमवाप्नोति तन्मे वद महामुने ॥ ३ ॥ शौनक उवाच ॥ इदमेव महाप्राज्ञ पृष्टवांश्च पितामहम् ॥ भीष्मं धर्मभृतां श्रेष्ठं धर्मपुत्रो युधिष्ठिरः ॥ ४ ॥ युधिष्ठिर उवाच ॥ पितामह महाप्राज्ञ सर्वशास्त्रविशारद ॥ प्रयाणकाले किं चिंत्यं मुमु-

क्षोस्तत्त्वचिंतकैः ॥ ५ ॥ किं नु स्मरन् कुरुश्रेष्ठ मरणे पर्युपस्थिते ॥ प्राप्नुयां परमां सिद्धिं श्रोतुमिच्छामि तत्त्वतः ॥ ६ ॥ भीष्म उवाच ॥ तद्युक्तं स्वहितं सूक्ष्मं प्रश्नमुक्तं त्वयानघ ॥ शृणुष्वावहितो राजन्नारदेन पुरा श्रुतम् ॥ ७ ॥ श्रीवत्सांकं जगद्बीजमनंतं लोकसाक्षिणम् ॥ पुरा नारायणं देवं नारदः परिपृष्टवान् ॥ ८ ॥ नारद उवाच ॥ त्वमक्षरं परं ब्रह्म निर्गुणं तमसः परम् ॥ आहुर्वेद्यं परं धाम ब्रह्माणं कमलोद्भवम् ॥ ९ ॥ भगवन् भूतभव्येश श्रद्दधानैर्जितेंद्रियैः ॥ कथं भक्तैर्विचिंत्योऽसि योगिभिर्मोक्षकांक्षिभिः ॥ १० ॥ किं नु

जाप्यं जपन्नित्यं कल्य उत्थाय मानवः ॥ कथं जपेत्सदा ध्या-
येद्ब्रूहि तत्त्वं सनातनम् ॥ ११ ॥ भीष्म उवाच ॥ श्रुत्वा
च तस्य देवर्षेर्वाक्यं वाक्यविशारदः ॥ प्रोवाच भगवान्विष्णु-
र्नारदाय च धीमते ॥ १२ ॥ श्रीभगवानुवाच ॥ हंत ते
कथयिष्यामि इमां दिव्यामनुस्मृतिम् ॥ यामधीत्य प्रयाणे
तु मद्भावायोपपद्यते ॥ १३ ॥ ॐकारमग्रतः कृत्वा मां
नमस्कृत्य नारद ॥ एकाग्रः प्रयतो भूत्वा इमं मंत्रमु-
दीरयेत् ॥ १४ ॥ ॐनमो भगवते वासुदेवाय इत्ययम्
॥ १५ ॥ अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ॥ पु-

मान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥ १६ ॥ क्षराक्षरवि-
सृष्टस्तु प्रोच्यते पुरुषोत्तमः ॥ अव्यक्तं शाश्वतं देवं प्र-
भवं पुरुषोत्तमम् ॥ प्रपद्ये पुंडरीकाक्षं देवं नारायणं हरिम्
॥ १७ ॥ लोकनाथं सहस्राक्षमक्षरं परमं पदम् ॥ भगवंतं प्रप-
न्नोऽस्मि भूतभव्यभवत्प्रभुम् ॥ १८ ॥ स्रष्टारं सर्वलोकानामनं-
तं विश्वतोमुखम् ॥ पद्मनाभं हृषीकेशं प्रपद्ये सत्यमच्युतम्
॥ १९ ॥ हिरण्यगर्भममृतं भूगर्भं तमसः परम् ॥ प्रभोः
प्रभुमनाद्यं च प्रपद्ये तं रविप्रभम् ॥ २० ॥ सहस्रशीर्षकं
देवं महर्षैः सत्त्वभावनम् ॥ प्रपद्ये सूक्ष्ममचलं वरेण्यमनघं

शुचिम् ॥२१॥ नारायणं पुराणेशं योगावासं सनातनम् ॥ संयोगं सर्वभूतानां प्रपद्ये ध्रुवमीश्वरम् ॥२२॥ क्षराक्षरविसृष्टस्तु प्रोच्यते पुरुषोत्तमः ॥ यः पुरा प्रलये प्राप्ते नष्टे स्थावरजंगमे ॥२३॥ ब्रह्मादिषु प्रलीनेषु नष्टे लोके चराचरे ॥ एकस्तिष्ठति विश्वात्मा स मे विष्णुः प्रसीदतु ॥२४॥ यः प्रभुः सर्वलोकानां येन सर्वमिदं ततम् ॥ चराचरगुरुर्देवः स मे विष्णुः प्रसीदतु ॥२५॥ आभूतसंप्लवे चैव प्रलीने प्रकृतौ महान् ॥ योऽवतिष्ठति विश्वात्मा स मे विष्णुः प्रसीदतु ॥२६॥ येन क्रांतास्त्रयो लोका दानवाश्च वशीकृताः ॥ शरण्यः सर्वलोकानां स मे विष्णुः प्रसीदतु ॥२७॥

यस्य हस्ते गदा चक्रं गरुडो यस्य वाहनम् ॥ शंखः करतले यस्य स मे विष्णुः प्रसीदतु ॥ २८ ॥ कार्यं क्रिया च करणं कर्ता हेतुः प्रयोजनम् ॥ अक्रियाकरणे कार्ये स मे विष्णुः प्रसीदतु ॥ २९ ॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च ॥ हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥ ३० ॥ शमीगर्भस्य यो गर्भस्तस्य गर्भस्य यो रिपुः ॥ रिपुगर्भस्य यो गर्भः स मे विष्णुः प्रसीदतु ॥ ३१ ॥ अग्निसोमार्कताराणां ब्रह्मरुद्रेंद्रयोगिनाम् ॥ यस्तेजयति तेजांसि स मे विष्णुः प्रसीदतु ॥ ३२ ॥ पर्जन्यः पृथिवी सस्यं कालो धर्मः क्रिया फलम् ॥

गुणाकरः स मे बभ्रुर्वासुदेवः प्रसीदतु ॥ ३३ ॥ योगावास
नमस्तुभ्यं सर्ववास वरप्रद ॥ हिरण्यगर्भ यज्ञांग पंचगर्भ
नमोऽस्तु ते ॥३४॥ चतुर्भूतपरं धाम लक्ष्म्यावास सदाच्युत ॥
शब्दादिवास नान्योऽसि वासुदेव प्रधानकृत् ॥ ३५ ॥ अजः
संगमनः पार्थो ह्यमूर्तिर्विश्वमूर्तिधृक् ॥ श्रीः कीर्तिः पंचका-
लज्ञो नमस्ते ज्ञानसागर ॥ ३६ ॥ अव्यक्ताद्व्यक्तमुत्पन्नमव्य-
क्ताद्यः परात्परः ॥ यस्मात् परतरं नास्ति तमस्मि शरणं गतः
॥ ३७ ॥ चिंतयंतो ह्यजं नित्यं ब्रह्मेशानादयः सुराः ॥
निश्चयं नाधिगच्छंति तमस्मि शरणं गतः ॥ ३८ ॥ जितेंद्रिया

जितात्मानो ज्ञानध्यानपरायणाः ॥ यं प्राप्य न निवर्तंते तमस्मि शरणं गतः ॥ ३९ ॥ एकांतेन जगत्कृत्स्नमवष्टभ्य स्थितः प्रभुः ॥ अग्राह्यो निर्गुणो नित्यस्तमस्मि शरणं गतः ॥ ४० ॥ सोमार्काग्निमयं तेजो या च तारामयी द्युतिः ॥ दिवि संजायते तेजः स महात्मा प्रसीदतु ॥ ४१ ॥ गुणात्मा निर्गुणश्चान्यो रश्मिवांश्चेतनो ह्यजः ॥ सूक्ष्मः सर्वगतो देहः स महात्मा प्रसीदतु ॥ ४२ ॥ अव्यक्तं सदधिष्ठानमचिंत्यं तमसः परम् ॥ प्रकृतिः प्रकृतिं भुंक्ते स महात्मा प्रसीदतु ॥ ४३ ॥ क्षेत्रज्ञः पंचधा भुंक्ते प्रकृतिं पंचभिर्मुखैः ॥

महागुणांश्च यो भुंक्ते स महात्मा प्रसीदतु ॥ ४४ ॥ सांख्य-योगाश्च ये चान्ये सिद्धाश्च परमर्षयः ॥ यं विदित्वा विमुच्यंते स महात्मा प्रसीदतु ॥ ४५ ॥ अतींद्रिय नमस्तुभ्यं लिंगैर्व्यक्तैर्न मीयसे ॥ ये च त्वां नाभिजानंति तमस्मि शरणं गतः ॥ ४६ ॥ कामक्रोधविनिर्मुक्ता रागद्वेषविवर्जिताः ॥ अन्यभक्ता न जानंति न पुनर्नारकी जनः ॥ ४७ ॥ एकांतिनो हि निर्द्वंद्वा निराशाः कर्मकारिणः ॥ ज्ञानाग्निदग्धकर्माणस्त्वां विशंति मनस्विनः ॥ ४८ ॥ अशरीरं शरीरस्थं समं सर्वेषु देहिषु ॥ पापपुण्यविनिर्मुक्ता भक्तास्त्वां पर्युपासते

॥ ४९ ॥ अव्यक्तबुद्ध्यहंकारमनोभूतेंद्रियाणि च ॥ त्वयि तानि न तेषु त्वं तेषु तानि न ते त्वयि ॥ ५० ॥ एकत्वाय च नानन्यं ये विदुर्यांति ते परम् ॥ समत्वमिह कांक्षेयं भक्त्या वै नान्यचेतसा ॥ ५१ ॥ चराचरमिदं सर्वं भूतग्रामं चतुर्विधम् ॥ त्वयि तंतौ च तत्प्रोतं सूत्रे मणिगणा इव ॥ ५२ ॥ स्रष्टा भोक्तासि कूटस्थो ह्यचिंत्यः सर्वसंज्ञितः ॥ अकर्ता हेतुरहितः पृथगात्मा व्यवस्थितः ॥ ५३ ॥ न मे भूतेषु संयोगः पुनर्भवतु जन्मनि ॥ अहंकारेण बुद्ध्या वा न मे योगस्त्रिभिर्गुणैः ॥ ५४ ॥ न मे धर्मो ह्यधर्मो वा नारंभो जन्म वा पुनः ॥

जरामरणमोक्षार्थं त्वां प्रपन्नोऽस्मि सर्वगम् ॥ ५५ ॥ विषयै-
रिंद्रियैश्चापि न मे भूयः समागमः ॥ ईश्वरोऽसि जगन्नाथ
किमतः परमुच्यते ॥ ५६ ॥ भक्तानां यद्धितं देव तत्ते हि त्रि-
दशेश्वर ॥ पृथिवीं यातु मे घ्राणं यातु मे रसनं जलम् ॥५७॥
रूपं हुताशने यातु स्पर्शो मे यातु मारुते ॥ श्रोत्रमाकाशम-
भ्येतु मनो वैकारिकं पुनः ॥ ५८ ॥ इंद्रियाणि गुणान्यांतु
स्वेषु स्वेषु च योनिषु ॥ पृथिवी यातु सलिलमापोऽग्निमन-
लोऽनिलम् ॥ ५९ ॥ वायुराकाशमभ्येतु मनश्चाकाशमेव च ॥
अहंकारं मनो यातु मोहनं सर्वदेहिनाम् ॥ ६० ॥ अहंकार-

स्तथा बुद्धिं बुद्धिरव्यक्तमेव च ॥ प्रधानं प्रकृतिं यातु गुण-
साम्ये व्यवस्थिते ॥ ६१ ॥ विसर्गः सर्वकरणैर्गुणभूतैश्च मे
भवेत् ॥ सत्त्वं रजस्तमश्चैव प्रकृतिं प्रविशंतु मे ॥ ६२ ॥ नै-
ष्कैवल्यपदं देव कांक्षेऽहं ते परंतप ॥ एकीभावस्त्वया मेऽस्तु
न मे जन्म भवेत् पुनः ॥ ६३ ॥ नमो भगवते तस्मै विष्णवे
प्रभविष्णवे ॥ त्वद्बुद्धिस्त्वद्गतप्राणस्त्वद्भक्तस्त्वत्परायणः ॥६४॥
त्वामेवाहं स्मरिष्यामि मरणे पर्यवस्थिते ॥ पूर्वदेहे कृता ये
मे व्याधयः प्रविशंतु माम् ॥ ६५ ॥ अर्दयंतु च मां दुःखा-
न्यृणं मे प्रतिमुच्यताम् ॥ अनुध्येयोऽसि मे देव न मे जन्म

भवेत्पुनः ॥ ६६ ॥ अस्माद् ब्रवीमि कर्माणि ऋणं मे न भवे-
दिति ॥ उपतिष्ठंतु मां सर्वे व्याधयः पूर्ववंचिताः ॥ ६७ ॥
अनृणो गंतुमिच्छामि तद्विष्णोः परमं पदम् ॥ अहं भगवत-
स्तस्य मम वासः सनातनः ॥ ६८ ॥ तस्याहं न प्रणश्यामि स
च मे न प्रणश्यति ॥ कर्मेंद्रियाणि संयम्य पंचभूतेंद्रियाणि च
॥ ६९ ॥ दशेंद्रियाणि मनसि अहंकारं तथा मनः ॥ अहंकारं
तथा बुद्धौ बुद्धिमात्मनि योजयेत् ॥ ७० ॥ आत्मबुद्धींद्रियं
पश्येद्बुद्ध्या बुद्धेः परात्परम् ॥ एवं बुद्धेः परं बुद्ध्वा संस्तभ्या-
त्मानमात्मना ॥ ७१ ॥ ततो बुद्धेः परं बुद्ध्वा लभते न पुनर्भ-

वम् ॥ ममायमिति तस्याहं येन सर्वमिदं ततम् ॥ ७२ ॥ आत्मन्यात्मनि संयोज्य परात्मानमनुस्मरेत् ॥ नमो भगवते तस्मै देहिनां परमात्मने ॥ ७३ ॥ नारायणाय भक्ताय एकनिष्ठाय शाश्वते ॥ हृदिस्थाय च भूतानां सर्वेषां च महात्मने ॥ ७४ ॥ इमामनुस्मृतिं दिव्यां वैष्णवीं पापनाशिनीम् ॥ स्वपन्विबुद्धश्च पठेद्यत्र यत्र समभ्यसेत् ॥ ७५ ॥ मरणे समनुप्राप्ते यदेकं मामनुस्मरेत् ॥ अपि पापसमाचारः स याति परमां गतिम् ॥ ७६ ॥ यद्यहंकारमाश्रित्य यज्ञदानतपःक्रियाः ॥ कुर्वन् फलमवाप्नोति पुनरावर्तनं च तत् ॥ ७७ ॥ अभ्यर्च्च-

यन् पितॄन् देवान् पठन् जुह्वन् बलिं दहन् ॥ ज्वलदग्नौ स्मरेद्यो मां लभते परमां गतिम् ॥ ७८ ॥ यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ यज्ञदानतपस्तस्मात्कुर्याद्रागविवर्जितः ॥ ७९ ॥ पौर्णमास्याममावास्यां द्वादश्यां च तथैव च ॥ श्रावयेच्छ्रद्दधानश्च मद्भक्तश्च विशेषतः ॥ ८० ॥ नम इत्येव यो ब्रूयान्मद्भक्तः श्रद्धयान्वितः ॥ तस्याक्षयो भवेल्लोकः श्वपाकस्यापि नारद ॥ ८१ ॥ किं पुनर्ये भजंते मां साधका विधिपूर्वकम् ॥ श्रद्धावंतो यतात्मानस्ते यांति परमां गतिम् ॥ ८२ ॥ कर्माण्याद्यंतवंतीह मद्भक्तोऽनंतमश्नुते ॥ मामेव

तस्माद्देवर्षे ध्याहि नित्यमतंद्रितः ॥ ८३ ॥ अज्ञानां चैव यो ज्ञानं दद्याद्धर्मोपदेशतः ॥ कृत्स्नां वा पृथिवीं दद्याद्येन तुल्यं न तत् फलम् ॥ ८४ ॥ तस्मात्प्रदेयं साधुभ्यो जपं बंधभयापहम् ॥ अवाप्स्यति ततः सिद्धिं प्राप्स्यते च पदं मम ॥८५॥ अश्वमेधसहस्रैश्च वाजपेयशतैरपि ॥ नासौ परमवाप्नोति मद्भक्तैर्यदवाप्यते ॥८६॥ भीष्म उवाच ॥ हरेः पृष्टं पुरा तेन नारदेन सुरर्षिणा ॥ यदुवाच ततः शंभुस्तदुक्तं समनुव्रतः ॥ ८७ ॥ त्वमप्येकमना भूत्वा ध्याहि ध्येयं गुणाधिकम् ॥ भजस्व सर्वभावेन परमात्मानमव्ययम् ॥ ८८ ॥ श्रुत्वैवं नारदो

वाक्यं दिव्यं नारायणोदितम् ॥ अत्यंतं भक्तिमान् देव एकांतित्वमुपेयिवान् ॥ ८९ ॥ नारायणमृषिं देवं दशवर्षाण्यनन्यभाक् ॥ इमं जपित्वा चाप्नोति तद्विष्णोः परमं पदम् ॥९०॥ किं तस्य बहुभिर्मंत्रैः किं तस्य बहुभिर्व्रतैः॥ नमो नारायणायेति मंत्रः सर्वार्थसाधकः ॥ ९१ ॥ किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ॥ यो नित्यं ध्यायते देवं नारायणमनन्यधीः ॥९२॥ ये नृशंसा दुरात्मानः पापाचाररतास्तथा ॥ तेऽपि यांति परं स्थानं नारायणपरायणाः ॥ ९३ ॥ अनन्यया मंदबुद्ध्या प्रतिभाति दुरात्मनाम् ॥ कुतर्काज्ञानदृष्टीनां विभ्रांतेंद्रियवर्त्मनाम्

॥ ९४ ॥ नमो नारायणयेति ये विदुर्ब्रह्म शाश्वतम् ॥ अंत-
काले जपाद्यांति तद्विष्णोः परमं पदम् ॥ ९५ ॥ आचारही-
नोऽपि मुनिप्रवीर भक्त्या विहीनोऽपि विनिंदितोऽपि ॥ किं
तस्य नारायणशब्दमात्रतो विमुक्तपापो विशतेऽच्युतां गतिम्
॥ ९६ ॥ कांतारवनदुर्गेषु कृच्छ्रेष्वापत्सु संयुगे ॥ दस्युभिः सन्नि-
रुद्धश्च नामभिर्मां प्रकीर्तयेत् ॥ ९७ ॥ जन्मांतरसहस्रेषु तपो-
ध्यानसमाधिभिः ॥ नराणां क्षीणपापानां कृष्णे भक्तिः प्र-
जायते ॥ ९८ ॥ नाम्नोऽस्ति यावती शक्तिः पापनिर्हरणे हरेः ॥
श्वपचोऽपि नरः कर्तुं क्षमस्तावन्न किल्बिषम् ॥ ९९ ॥ न ता-

वत्पापमस्तीह यावन्नामाहृतं हरेः ॥ अतिरेकभयादाहुः प्रा-
यश्चित्तांतरं वृथा ॥ १०० ॥ गत्वा गत्वा निवर्तंते चंद्रसूर्या-
दयो ग्रहाः ॥ अद्यापि न निवर्तंते द्वादशाक्षरचिंतकाः ॥ १ ॥
न वासुदेवात्परमस्ति मंगलं न वासुदेवात्परमस्ति पावनम् ॥
न वासुदेवात्परमस्ति दैवतं तं वासुदेवं प्रणमन्न सीदति ॥२॥
इमां रहस्यां परमामनुस्मृतिं योऽधीत्य बुद्धिं लभते च नैष्ठि-
कीम् ॥ विहाय पापं विनिमुच्य संकटात् स वीतरागो विच-
रेन्महीमिमाम् ॥ १०३ ॥ इति श्रीमन्महाभारते शतसाह-
स्र्यां संहितायां वैयासिक्यामानुशासनिके पर्वणि दानधर्मे
श्रीविष्णोर्दिव्यमनुस्मृतिस्तोत्रं संपूर्णम् ॥ शुभं भवतु ॥ ॥

॥ इति अनुस्मृतिः समाप्ता ॥

॥ अथ गजेंद्रमोक्षः प्रारभ्यते ॥

श्रीगणेशाय नमः ॥ श्रीगोपालकृष्णाय नमः ॥ शतानीक उवाच ॥ मया हि देवदेवस्य विष्णोरमिततेजसः ॥ श्रुताः संभूतयः सर्वा गदतस्तव सुव्रत ॥ १ ॥ यदि प्रसन्नो भगवाननुग्राह्योऽस्मि वा यदि ॥ तदहं श्रोतुमिच्छामि नृणां दुःस्वप्ननाशनम् ॥ २ ॥ स्वप्नादिषु महाभाग दृश्यंते ये शुभाशुभाः ॥ फलानि च प्रयच्छंति तद्गुणान्येव भार्गव ॥ ३ ॥ तादृक् पुण्यं पवित्रं च नृणामतिशुभप्रदम् ॥ दुष्टस्वप्नोपशमनं तन्मे विस्तरतो वद ॥ ४ ॥ शौनक उवाच ॥ इदमेव महाभाग पृष्टवान्स्वपितामहम् ॥ भीष्मं धर्मभृतां श्रेष्ठं धर्मपुत्रो युधिष्ठिरः

॥ ५ ॥ भीष्म उवाच ॥ आद्यं पुरुषमीशानं पुरुहूतं पुरातनम् ॥ ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम् ॥ ६ ॥ असच्च सच्च यद्विश्वं नित्यं सदसतः परम् ॥ परं पराणां स्रष्टारं पुराणं परमव्ययम् ॥ ७ ॥ मांगल्यं मंगलं विष्णुं वरेण्यमनघं शुचिम् ॥ नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ॥ ८ ॥ प्रवक्ष्यामि महा-पुण्यं कृष्णद्वैपायनस्य च ॥ येनोक्तेन श्रुतेनापि नश्यते सर्व-पातकम् ॥ ९ ॥ नारायणसमो देवो न भूतो न भविष्यति ॥ एतेन सत्यवाक्येन सर्वार्थान्साधयाम्यहम् ॥ १० ॥ किं तस्य बहुभिर्मंत्रैः किं तस्य बहुभिर्व्रतैः ॥ नमो नारायणायेति मंत्रः

सर्वार्थसाधकः ॥ ११ ॥ जज्ञे बहुज्ञं परमत्युदारं यं द्वीपमध्ये सुतमात्मवंतम् ॥ पराशराद्गंधवती महर्षेस्तस्मै नमोऽज्ञानतमोनुदाय ॥ १२ ॥ नमो भगवते तस्मै व्यासायामिततेजसे ॥ यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमाम् ॥ १३ ॥ वैशंपायनमासीनं पुराणोक्तिविचक्षणम् ॥ इममर्थं स राजर्षिः पृष्टवान् जनमेजयः ॥ १४ ॥ जनमेजय उवाच ॥ किं जपन्मुच्यते पापात्किंजपन्सुखमश्नुते ॥ दुःस्वप्ननाशनं पुण्यं श्रोतुमिच्छामि मानद ॥ १५ ॥ वैशंपायन उवाच ॥ एवमेव पुरा प्रश्नं पृष्टवांस्ते पितामहः ॥ भीष्मं वै व्रतिनां श्रेष्ठं तं चाहं कथया-

मि ते ॥ १६ ॥ देवव्रतं महाप्राज्ञं सर्वशास्त्रविशारदम् ॥ विन-
येनोपसंगम्य पर्यपृच्छद्युधिष्ठिरः ॥ १७ ॥ युधिष्ठिर उवाच ॥
दुःस्वप्नदर्शनं घोरमवेक्ष्य भरतर्षभ ॥ प्रयतः किं जपेज्जाप्यं
विबुद्धः किमनुस्मरेत् ॥ १८ ॥ कस्य कुर्यान्नमस्कारं प्रातरु-
त्थाय मानवः ॥ किं च ध्यायेत सततं किं पूज्यं वा भवेत्सदा
॥ १९ ॥ पितामहप्रसादेन बुद्धिभेदो भवेन्न मे ॥ तदहं श्रोतु-
मिच्छामि ब्रूहि नो वदतां वर ॥ २० ॥ भीष्म उवाच ॥ शृणु
राजन्महाबाहो कथयिष्ये ह शांतिकम् ॥ दुःस्वप्नदर्शने जाप्यं
यद्वा नित्यं समाहितैः ॥ २१ ॥ अत्राप्युदाहरंतीममितिहासं

पुरातनम् ॥ गजेंद्रमोक्षणं पुण्यं कृष्णस्याद्भुतकर्मणः ॥ २२ ॥
सर्वरत्नमयः श्रीमांस्त्रिकूटो नाम पर्वतः ॥ सुतः पर्वतराजस्य
सुमेरोर्भास्करद्युतेः ॥ २३ ॥ क्षीरोदजलवीच्युग्रैर्धौतामलशि-
लातलः ॥ उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः ॥ २४ ॥
अप्सरोभिः परिवृतः श्रीमान्प्रस्रवणाकुलः ॥ गंधर्वैः किन्नरै-
र्यक्षैः सिद्धचारणपन्नगैः ॥ २५ ॥ मृगैः सिंहैर्गजेंद्रैश्च वृत-
गात्रो विराजते ॥ पुन्नागैः कर्णिकारैश्च सुबिल्वैर्दिव्यपाटलैः
॥ २६ ॥ चूतनिंबकदंबैश्च चंदनागरुचंपकैः ॥ शालैस्तालैस्त-
मालैश्च तरुभिश्चार्जुनैस्तथा ॥ २७ ॥ बकुलैः कुंदपुष्पैश्च सर-

लैर्देवदारुभिः ॥ मंदारकुसुमैश्चान्यैः पारिजातैश्च सर्वशः ॥ २८ ॥ एवं बहुविधैर्वृक्षैः सर्वतः समलंकृतः ॥ नानाधात्वंकितैः श्रृंगैः प्रस्रवद्भिः समंततः ॥ २९ ॥ शोभितो रुचिरप्रख्यैस्त्रिभिर्विस्तीर्णसानुभिः ॥ मृगैः शाखामृगैः सिंहैर्मातंगैश्च सदामदैः ॥ ३० ॥ जीवंजीवकसंघुष्टं चकोरशिखिनादितम् ॥ तस्यैकं कांचनं श्रृंगं सेव्यते यद्दिवाकरः ॥ ३१ ॥ नानापुष्पसमाकीर्णं नानाश्रृंगैः समाकुलम् ॥ द्वितीयं राजतं श्रृंगं सेव्यते यन्निशाकरः ॥ ३२ ॥ पांडुरांबुदसंकाशं तुषारचयसन्निभम् ॥ वज्रेंद्रनीलवैडूर्यतेजोभिर्भासयन्नभः ॥ ३३ ॥

तृतीयं ब्रह्मसदनं प्रकृष्टं श्रृंगमुत्तमम् ॥ पद्मरागसमप्रख्यं तारागणसमन्वितम् ॥ ३४ ॥ नैतत्कृतघ्नाः पश्यंति न नृशंसा न नास्तिकाः ॥ नातप्ततपसो लोके ये च पापकृतो जनाः ॥ ३५ ॥ नानाराधितगोविंदाः शैलं पश्यंति मानवाः ॥ तस्य सानुमतः पृष्ठे सरः कांचनपंकजम् ॥ ३६ ॥ कारंडवसमाकीर्णं राजहंसोपशोभितम् ॥ मत्तभ्रमरसंघुष्टं चकोरशिखिनादितम् ॥ ३७ ॥ कमलोत्पलकह्लारपुंडरीकोपशोभितम् ॥ कुमुदैः शतपत्रैश्च कांचनैः समलंकृतम् ॥ ३८ ॥ पद्मैर्मरकतप्रख्यैः पुष्पैः कांचनसन्निभैः ॥ गुल्मैः कीचकवेणूनां समंता-

त्परिवारितम् ॥ ३९ ॥ अत्यद्भुतं महास्थानं विचित्रशिखरा-
कुलम् ॥ शतयोजनविस्तीर्णं शतयोजनमायतम् ॥ ४० ॥
पंचयोजनमूर्धानं सर एतत्प्रमाणतः ॥ हिमखंडोदकं राजन्
सुस्वादममृतोपमम् ॥४१॥ त्रैलोक्येऽदृष्टपूर्वं च यत्तत्सरमनु-
त्तमम् ॥ सुप्रसन्नं सरो दिव्यं देवानामपि दुर्लभम् ॥ ४२ ॥
खातेन द्विगुणं प्रोक्तं शरद्द्यौरिव निर्मलम् ॥ उपहाराय
देवानां सिद्धाद्यार्चितपंकजम् ॥ ४३ ॥ तस्मिन्सरसि दु-
ष्टात्मा विरूपोंऽतर्जलाशयः ॥ आसीद् ग्राहो गजेंद्राणां
दुराधर्षो महाबलः ॥ ४४ ॥ अथ दंतोज्ज्वलमुखः कदा-

चिद्गजयूथपः ॥ आजगाम तृषाक्रांतः करेणुपरिवारितः ॥ ४५ ॥ मदस्रावी जलाकांक्षी पादचारीव पर्वतः ॥ वासयन्मदगंधेन महानैरावतोपमः ॥ ४६ ॥ गजो ह्यंजनसंकाशो मदाच्चलितलोचनः ॥ तृषितः पानकामोऽयमवतीर्णश्च तत्सरः ॥ ४७ ॥ पिबतस्तस्य तत्तोयं ग्राहश्च समपद्यत ॥ सुलीनः पंकजवने यूथमध्यगतः करी ॥ ४८ ॥ गृहीतस्तेन रौद्रेण ग्राहेणातिबलीयसा ॥ पश्यंतीनां करेणूनां क्रोशंतीनां सुदारुणम् ॥ ४९ ॥ नीयते पंकजवने ग्राहेणाव्यक्तमूर्तिना ॥ गजो ह्याकर्षते तीरं ग्राहश्चाकर्षते जलम् ॥ ५० ॥ तयोर्युद्धं

महाघोरं दिव्यवर्षसहस्रकम् ॥ वारुणैः संयुतः पाशैर्निष्प्रय-
त्नगतिः कृतः ॥ ५१ ॥ वेष्ट्यमानः स घोरैस्तु पाशैर्नागो दृढै-
स्तथा ॥ विस्फूर्जितमहाशक्तिर्विक्रोशंश्च महारवान् ॥ ५२ ॥
व्यथितः स निरुत्साहो गृहीतो घोरकर्मणा ॥ परमापदमा-
पन्नो मनसाचिंतयद्धरिम् ॥ ५३ ॥ स तु नागवरः श्रीमान्ना-
रायणपरायणः ॥ तमेव शरणं देवं गतः सर्वात्मना तदा
॥ ५४ ॥ एकाग्रो निगृहीतात्मा विशुद्धेनांतरात्मना ॥ नैक-
जन्मांतराभ्यासाद्भक्तिमान् गरुडध्वजे ॥ ५५ ॥ नान्यं देवं
महादेवात् पूजयामास केशवात् ॥ दिग्बाहुं स्वर्गमूर्धानं भूः-

पादं गगनोदरम् ॥ ५६ ॥ आदित्यचंद्रनयनमनंतं विश्वतो-
मुखम् ॥ भूतात्मानं च मेघाभं शंखचक्रगदाधरम् ॥ ५७ ॥
सहस्रशुभनामानमादिदेवमजं विभुम् ॥ संगृह्य पुष्करायेण
कांचनं कमलोत्तमम् ॥ ५८ ॥ निवेद्य मनसा ध्यात्वा पूजां
कृत्वा जनार्दने ॥ आपद्विमोक्षमन्विच्छन् गजः स्तोत्रमुदी-
रयत् ॥ ५९ ॥ गजेंद्र उवाच ॥ ॐ नमो मूलप्रकृतये अजि-
ताय महात्मने ॥ अनाश्रयाय देवाय निःस्पृहाय नमो नमः
॥ ६० ॥ नम आद्याय बीजाय आर्षेयाय प्रवर्तिने ॥ अनंताय
च नैकाय अव्यक्ताय नमो नमः ॥६१॥ नमो गुह्याय गूढाय

गुणाय गुणधर्मिणे ॥ अतर्क्यायाप्रमेयाय अतुलाय नमो नमः
॥ ६२ ॥ नमः शिवाय शांताय निश्चयाय यशस्विने ॥ सनात-
नाय पूर्वाय पुराणाय नमो नमः ॥ ६३ ॥ नमो जगत्प्रतिष्ठाय
गोविंदाय नमो नमः ॥ नमो देवाधिदेवाय स्वभावाय नमो नमः
॥ ६४ ॥ नमोस्तु पद्मनाभाय सांख्ययोगोद्भवाय च ॥ विश्वे-
श्वराय देवाय शिवाय हरये नमः ॥६५॥ नमोस्तु तस्मै देवाय
निर्गुणाय गुणात्मने ॥ नारायणाय देवाय देवानां पतये नमः
॥६६॥ नमो नमः कारणवामनाय नारायणायामितविक्रमाय ॥
श्रीशार्ङ्गचक्रासिगदाधराय नमोऽस्तु तस्मै पुरुषोत्तमाय॥६७॥

गुह्याय वेदनिलयाय महोदराय सिंहाय दैत्यनिधनाय चतुर्भु-
जाय || ब्रह्मेंद्ररुद्रमुनिचारणसंस्तुताय देवोत्तमाय वरदाय
नमोऽच्युताय || ६८ || नागेंद्रभोगशयनासनसुप्रियाय गोक्षी-
रहेमशुकनीलघनोपमाय || पीतांबराय मधुकैटभनाशनाय
विश्वाय चारुमुकुटाय नमोऽक्षराय || ६९ || नाभिप्रजातकम-
लासनसंस्तुताय क्षीरोदकार्णवनिकेतयशोधराय || नानावि-
चित्रमुकुटांगदभूषणाय योगेश्वराय विरजाय नमो वराय
|| ७० || भक्तिप्रियाय वरदीप्तिसुदर्शनाय फुल्लारविंदविपुला-
यतलोचलाय || देवेंद्रविघ्नशमनोद्यतपौरुषाय नारायणाय वर-

दाय नमोऽच्युताय ॥ ७१ ॥ नारायणाय परलोकपरायणाय कालाय कालकमलायतलोचनाय ॥ रामाय रावणविनाशकृतोद्यमाय धीराय धीरतिलकाय नमो वराय ॥ ७२ ॥ पद्मासनाय मणिकुंडलभूषणाय कंसांतकाय शिशुपालविनाशनाय ॥ गोवर्धनाय सुरशत्रुनिकृंतनाय दामोदराय विरजाय नमो वराय ॥ ७३ ॥ ब्रह्मायनाय त्रिदशायनाय लोकैकनाथाय हितात्मकाय ॥ नारायणायार्तिविनाशनाय महावराहाय नमस्करोमि ॥ ७४ ॥ कूटस्थमव्यक्तमचिंत्यरूपं नारायणं कारणमादिदेवम् ॥ युगांतशेषं पुरुषं पुराणं तं वासुदेवं शरणं

परमां गतिम् ॥ ८५ ॥ प्रभवं तं गुणाध्यक्षमक्षरं परमं पदम् ॥ शरण्यं शरणार्तानां प्रपद्ये भक्तवत्सलम् ॥ ८६ ॥ त्रिविक्रमं त्रिलोकेशं सर्वेषां प्रपितामहम् ॥ योगात्मानं महात्मानं प्रपद्येऽहं जनार्दनम् ॥ ८७ ॥ आदिदेवमजं विष्णुं व्यक्ताव्यक्तं सनातनम् ॥ नारायणमणीयांसं प्रपद्ये ब्राह्मणप्रियम् ॥ ८८ ॥ अकूपाराय देवाय नमः सर्वमहाद्युते ॥ प्रपद्ये देवदेवेशमणीयांसमणोः सदा ॥ ८९ ॥ एकाय लोकनाथाय परतः परमात्मने ॥ नमः सहस्रशिरसे अनंताय नमो नमः ॥ ९० ॥ तमेव परमं देवमृषयो वेदपारगाः ॥ कीर्तयंति च सर्वे वै ब्रह्मा-

दीनां परायणम् ॥ ९१ ॥ नमस्ते पुंडरीकाक्ष भक्तानामभ-
यंकर ॥ सुब्रह्मण्य नमस्तेऽस्तु त्राहि मां शरणागतम् ॥ ९२ ॥
तावद्भवति मे दुःखं चिंतासंसारसागरे ॥ यावत्कमलपत्राक्षं
न स्मरामि जनार्दनम् ॥ ९३ ॥ भीष्म उवाच ॥ भक्तिं तस्य
तु संचिंत्य नागस्यामोघसंस्तवात् ॥ प्रीतिमानभवद्राजंश्छ्रुत्वा
चक्रगदाधरः ॥ ९४ ॥ आरुह्य गरुडं विष्णुराजगाम सुरोत्तमः॥
सांनिध्यं कल्पयामास तस्मिन् सरसि लोकधृक् ॥ ९५ ॥
ग्राहग्रस्तं गजेंद्रं च तं ग्राहं च जलाशयात् ॥ उज्जहाराप्रमे-
यात्मा तरसा मधुसूदनः ॥ ९६ ॥ जलस्थं दारयामास ग्राहं

चक्रेण माधवः ॥ मोचयामास नागेंद्रं पाशेभ्यः शरणागतम्
॥ ९७ ॥ स हि देवलशापेन हूहूर्गंधर्वसत्तमः ॥ ग्राहत्वमग-
मत्कृष्णाद्वधं प्राप्य दिवं गतः ॥ इदमप्यपरं गुह्यं राजन्पुण्यत-
मं शृणु ॥ ९८ ॥ युधिष्ठिर उवाच ॥ कथं शापोऽभवत्तावद्ग-
न्धर्वस्य महात्मनः ॥ एतदिच्छाम्यहं श्रोतुं विस्तरेण पितामह
॥ ९९ ॥ भीष्म उवाच ॥ यथा तौ शापितौ तेन देवलेन महा-
त्मना ॥ हाहाहूहूरिति ख्यातौ गीतवाद्यविशारदौ ॥ १०० ॥
उर्वशी मेनका रंभा तथान्ये चाप्सरोगणाः ॥ शक्रस्य पुरतो
राजन् नृत्यंते ताः सुमध्यमाः ॥ १ ॥ ततस्तु तौ गायमानौ

गंधर्वौ राजसद्मनि ॥ अन्योन्यं कुरुतः स्पर्धां शक्रस्य पुरतः स्थितौ ॥ २ ॥ आवयोरुभयोर्मध्ये यः श्रेष्ठो गीतवाद्ययोः ॥ तं वदस्व सुरश्रेष्ठ ज्ञात्वा गीतस्य लक्षणम् ॥ ३ ॥ गंधर्वयोर्वचः श्रुत्वा प्रत्युवाच शतक्रतुः ॥ युवयोर्गीतवाद्येषु विशेषो नोपलभ्यते ॥ ४ ॥ एक एव मुनिश्रेष्ठो देवलो नाम नामतः ॥ युवयोः संशयच्छेत्ता भविष्यति न संशयः ॥ ५ ॥ ततस्तु तौ शक्रवचो निशम्य प्रणम्य राजन् शिरसा सुरोत्तमम् ॥ गतौ सुहृष्टौ जयकांक्षिणौ तौ यत्राश्रमे तिष्ठति स द्विजाग्र्यः ॥ ६ ॥ ततो दृष्ट्वा मुनिश्रेष्ठं देवलं शंसितव्रतम् ॥ अभिवाद्य महात्मानमूचतुः

पार्श्वतः स्थितौ ॥ ७ ॥ शक्रेण प्रेषितौ देव त्वत्समीपे द्विजो-
त्तम ॥ एकस्य नौ जयं देहि यत्ते मनसि रोचते ॥ ८ ॥ पृथक्
चरंतौ गायंतौ रुचिरं मधुराक्षरम् ॥ न किंचिद्वदते वाक्यं
मुनिर्मौनस्य धारणात् ॥ ९ ॥ शृण्वन्नपि पदं तेषां न किंचिद्व-
दते मुनिः ॥ तदा तौ कुपितौ तस्य देवलस्य महात्मनः॥११०॥
ऊचतुश्च रुषा वाक्यं गंधर्वौ कालचोदितौ ॥ मूढोऽयं नाभिजा-
नाति निश्चयं गीतवाद्ययोः ॥ ११ ॥ निशम्य तद्वचस्तेषां गंध-
र्वाणां मदान्वितम् ॥ क्रोधादुत्थाय विप्रेंद्र इदं वचनमब्रवीत्
॥ १२ ॥ एष हूहूर्दुरात्मा तु ग्राहत्वं यातु मूढधीः ॥ त्वमेव

गजराजस्तु भवस्व गिरिगह्वरे ॥ १३ ॥ एवं शापं ददौ क्रुद्धो देवलः सुमहातपाः ॥ ततस्तौ शापितौ तेन देवलेन महात्मना ॥ १४ ॥ प्रणम्य शिरसा विप्रं गंधर्वाविदमूचतुः ॥ भूमंडलगतौ ह्यावां प्रसादं कुरु सुव्रत ॥१५॥ निश्चयं वद विप्रेंद्र येन शापाद्विमुच्यतः॥ ततस्तौ पुरुषौ दृष्ट्वा उभौ शापभयार्दितौ॥१६॥ प्रत्युवाच मुनिश्रेष्ठो गंधर्वाणां भयापहम् ॥ मेरुपृष्ठे सरो रम्यं वहुवृक्षसमाकुलम् ॥ १७ ॥ नानापक्षिगणाढ्यं च द्वितीय इव सागरः॥ तस्मिन् सरोवरे रम्ये ग्राहो नित्यं भविष्यसि ॥१८॥ तृषार्तस्तत्र मातंगो गमिष्यति नगोत्तमात् ॥ तयोर्मध्ये महद्युद्धं

भविष्यति सुदारुणम् ॥ १९ ॥ ग्राहेणाकृष्यमाणस्तु गजः स्तोत्रं करिष्यति ॥ तदैव देवदेवेशस्तुष्यते नात्र संशयः ॥ १२० ॥ ततो नारायणः प्रीतः शापात्त्वां मोचयिष्यति ॥ इत्युक्त्वा ऋषिणा तेन वरेणैतौ प्रमोदितौ ॥ २१ ॥ ग्राहत्वमगमत्सोऽथ वधं प्राप्य दिवं गतः ॥ आपद्विमुक्तो युगपद्गजो गंधर्व एव च ॥ २२ ॥ गजोऽपि मुक्ततां यातः श्रीकृष्णेन विमोक्षितः ॥ तस्माच्छापाद्विनिर्मुक्तो गजो गंधर्व एव च ॥ २३ ॥ तौ च स्वं स्वं वपुः प्राप्य प्रणिपत्य जनार्दनम् ॥ गजो गंधर्वराजश्च परां निर्वृतिमागतौ ॥ २४ ॥ प्रीतिमान् पुंडरीकाक्षः शरणागत-

वत्सलः ॥ अभवद्देवदेवेशस्ताभ्यां चैव प्रपूजितः ॥ २५ ॥
भजंतं गजराजानमवदन्मधुसूदनः ॥ श्रीभगवानुवाच ॥ ये
मां त्वां च सरश्चैव ग्राहस्य च विदारणम् ॥ २६ ॥ गुल्मकी-
चकवेणूनां तं च शैलवरं तथा ॥ प्रभासं भास्करं गंगां नैमि-
षारण्यपुष्करम् ॥ २७ ॥ प्रयागं ब्रह्मतीर्थं च दंडकारण्यमेव
च ॥ ये स्मरिष्यंति मनुजाः प्रयताः स्थिरबुद्धयः ॥ २८ ॥
दुःस्वप्नो नश्यते तेषां सुस्वप्नश्च भविष्यति ॥ अनिरुद्धं गजं
ग्राहं वासुदेवं महाद्युतिम् ॥ २९ ॥ संकर्षणं महात्मानं प्रद्युम्नं
च तथैव च ॥ मत्स्यं कूर्मं वराहं च वामनं तार्क्ष्यमेवच ॥१३०॥